Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्री रङ्गेश्वरनाथमिश्रमधुरेशप्रणीतः

प्रत्यभिज्ञाप्रदीपः

सम्पादकोऽनुवादकश्च
डॉ रामकुमार शर्मा

नाग प्रकाशक

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by FA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

-श्रीरङ्गेश्वरनाथमिश्रमधुरेशप्रणीतः-

प्रत्यभिज्ञाप्रदीपः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

-श्रीरङ्गेश्वरनाथमिश्रमधुरेशप्रणीतः-

प्रत्यभिज्ञाप्रदीपः

सम्पादकोऽनुवादकश्च

डॉ० रामकुमार शर्मा

(वरिष्ठ प्राध्यापकः)

ज० ना० व्र० आदर्श संस्कृत महाविद्यालय

रामभद्रपुर-लगमा, जि०-दरभङ्गा (विहार)

NAG PUBLISHERS

नाग पब्लिशर्स

११ ए/ यू० ए०, जवाहर नगर, दिल्ली-११०००७

(भारत)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

This Publication has been brought out with the financial assistance from Rashtriya Sanskrit Sansthan, New Delhi.

© लेखक

(१) ११ए/यू. ए. जवाहर नगर, दिल्ली-११०००७
दूरभाष-३९६७९७५, २९१५८८३, ३९५७४४०
(२) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०

ISBN : 81-7081-434-0

प्रथम संस्करण : १९९८

मूल्य : ५२.००

श्री सुरेन्द्र प्रताप द्वारा नाग पब्लिशर्स ११ ए०/यू० ए०, जवाहर नगर, दिल्ली ११०००७ द्वारा प्रकाशित तथा जी. प्रिंट. प्रोसेस, ३०८/२ शहजादा बाग, दयाबस्ती दिल्ली ११००३५ द्वारा मुद्रित। अक्षरयोजक ए० आर० प्रिंटर्स, डी-१०२ न्यू सीलमपुर, दिल्ली-११००५३

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

—भूमिका—

निपीतसाहित्यसुधासमुद्रं
प्रसन्नमुद्रं वदनं वहन्तम्।
समस्तविद्याऽमलमानसन्तं
ध्यायामि रङ्गेश्वरनाथमिश्रम्॥

अस्ति विश्वविश्रुतेषु समस्तानवद्यविद्यासमज्ञापराक्रम-शालिशालीनानेकमनीषिविभूषितेषु विबुद्धबुद्धेषु विहारप्रान्तगौरवेषु मगधेषु समवेतनैकधर्माया नारायणमूर्तेरिव गयायाः प्रतीच्यां दिशि नव्यं भव्यमौरङ्गाबादनामधेयं मण्डलम्। ततो नैऋत्यां वर्तते समुषितश्री-सरस्वतीकः शिष्टाचारविचारवित्तानां विदितवेदितव्यानां भव्यानां समधीताध्यापितविविधशास्त्रशिष्याणां परोपकारमहाव्रतिनां साक्षात्कृतपरमतत्त्वानां समासादितमहत्त्वानां प्रथितयशसां दीप्ततेजसां श्रीलक्ष्मीसेवितततया नारायणायमानानां दिव्यब्राह्मणानां निवासः करहरी-नामधेयः सकलगुणग्रामो ग्रामः। तत्रैव दिव्यविप्रवंशे सकलानवद्यविद्याविचक्षणो देवनारायणमिश्रो जज्ञे। तेन नैकविद्यागङ्गाधरः सुतो लेभे गङ्गाधरः संज्ञया। स गङ्गाधरमिश्रोऽल्पीयसैवानेहसा काशीं गत्वा सकलेषु शास्त्रीयेषु विषयेषु पाण्डित्यमवाप स्मरहरनगरे पण्डितमण्डलीषु प्राप परां प्रतिष्ठां दिक्षु स्वयशोराशिं वितेने च। तदीयं शास्त्रीयं पाण्डित्यं लोकोत्तरां तान्त्रिकीं सिद्धिं च कर्णोपकर्णिकया श्रावं श्राव चमत्कृतचेता अनपत्यो ग्वालियरस्य राजा माधवरावस्मिन्धिया पत्रद्वारा पश्चात् स्वयमागत्य च गङ्गाधरमिश्रं ग्वालियरं निनाय स्वकीयं सिंहासनार्धं समर्प्य

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भृशं सभाजयामास च। गङ्गाधरः पुत्रेष्ट्या माधवरावस्य तनयं तूर्णमुत्पाद्य विपुलां विपुलां विपुलं धनं च लब्ध्वा आगरानगरे सर्वस्वं व्ययीकृत्य आङ्लमहाविद्यालयं निर्ममौ कतिचित्कालांस्तत्र तन्त्रमध्याप्य मथुरायां विद्यार्थिनः पाठयन् स्वं समयं निनाय गङ्गाधरमिश्रः। अस्यैवाऽन्ववाये समागच्छन्ति "प्रत्यभिज्ञाप्रदीप"- ग्रन्थस्य प्रकृतस्य प्रणेतारो रङ्गेश्वरनाथमिश्राः। एभिरस्य ग्रन्थस्यान्ते यः स्वकीयो वंशवृक्ष उल्लिखितः स एवं प्रतिफलति–



प्रत्यभिज्ञाप्रदीपस्य प्रणेतरोऽस्मद्गुरुचरणा रङ्गेश्वरनाथमिश्रा रमानाथमिश्राद् वैक्रमाब्दे १९७३ तमे तस्मिन्नेव करहीग्रामे प्रादुर्बभूवुः। एषमुपरि श्रियः सरस्वत्याश्च प्रसादः समरस आसीत्। इमे शैशवं राजकुमारवद् व्यतीयुः। पिता ह्येषां सामन्ताधिपतिरेवाऽऽसीत्। आसन् प्रचुरा भूमयो मथुरायाम् अयोध्यायां च। शैशवे व्यतीते

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रङ्गेश्वरनाथमिश्रास्तस्मिन्नेवौरङ्गावादमण्डले 'दघपा' ग्रामे "कलक्टर साहब" इति विख्यातस्य रमावल्लभमिश्रस्य पित्रा बालगोविन्दमिश्रेण स्थापिते संस्कृतविद्यालये सुरभारतीमध्येतुं प्रेषिताः। तत्र जितक्रोधेभ्यः सकलशास्त्रज्ञेभ्योऽपि शाब्दिकशिरोमणिभ्यः श्रीदामोदरमिश्रेभ्यः पाणिनीये तन्त्रे प्रौढं पाण्डित्यमवापुस्ते। तत्रैव हिन्दीसाहित्याकाशभास्करा विश्वविश्रुतकीर्तयो जानकीवल्लभशास्त्रिणः प्रणीतगीतापरम लघुमञ्जूषादिटीकाग्रन्था वंशीधरमिश्राश्च रङ्गेश्वरनाथमिश्रस्य बालसखायावभूताम्। दामोदरमिश्रस्य रङ्गेश्वरनाथवंशीधरमिश्र-जानकीवल्लभशास्त्रिणस्त्रयोऽपि शिष्याः पाणिनि-कात्यायन-पतञ्जलिवत् परां ख्यातिमवापुः।

पश्चाद् रङ्गेश्वरनाथमिश्रा वाराणसीं गत्वा लालघाटे विड़ला संस्कृतमहाविद्यालये तदानीन्तनवाराणसेयविद्वन्नक्षत्रनक्षत्रेशेभ्यः शाब्दिकशिरोमणिभ्यः श्रीसंभापतिउपाध्यायेभ्यः स्वगुरुगुरुभ्योऽपि शब्दशास्त्रीयं पाण्डित्यमवापुः।

पश्चात् साहित्ये वेदान्ते दर्शनान्तरेषु आयुर्वेदे च प्रौढं पाण्डित्यं प्रापुः संस्कृतसेवाव्रतं च दधू रङ्गेश्वरनाथमिश्राः। नैकेषु शिक्षास्थानेषु संस्कृतमध्यापयामासुस्ते। राजकीये संस्कृतमहाविद्यालये पाटलिपुत्रस्थे राँचीस्थे च साहित्यप्राध्यापकपदमलञ्चक्रुस्ते। अन्ते सेवानिवृत्ताः सन्तः कामेश्वरसिंहसंस्कृतविश्वविद्यालये सम्मानितप्राध्यापकपदं मण्डयन्तः २/१०/१९८६ तमे रिव्रष्टाब्दे मर्त्यलोकमिमं विहाय गोलोकं जग्मुः। तदीयं शिरो निर्भिद्य तदीय आत्मा लीनोऽभवत् परब्रह्मणीति मन्ये।

मया स्वगुरुभिस्तै रङ्गेश्वरनाथमिश्रैः सह षड् वर्षाणि यावदुषितम्। तदानीं तद्विषये यदनुभूतं तत् किञ्चिल्लिख्यते–

प्रकृतप्रत्यभिज्ञाप्रदीपग्रन्थकृतां श्रीरङ्गेश्वरनाथमिश्राणां व्यक्तित्वं विद्यया वपुषा वाचा सदाचारेण चाऽतीवसमाकर्षकमासीत्। व्याकरणे वेदान्ते साहित्ये आयुर्वेदे ज्योतिषे तन्त्रे चैषां सरस्वती सममलीलायत। व्याकरणे तु महत्तमा श्रद्धाऽऽसीत्। एषां पूज्यपादानां विद्या यथा

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

हृदयङ्गमाऽऽसीत् तथा तस्याश्शिष्येषु सङ्क्रान्तिरपि। केचिद् भवन्ति ज्ञानवन्त एव, परे चाऽध्यापने तथा कुशला भवन्ति यथा प्रौढज्ञानिनो न भवन्ति। परन्तु येषां ज्ञानं प्रगाढं शिष्येषु तस्य संक्रमणं च सरलं भवति त एव कुशला अध्यापका निगद्यन्ते। तथा चाऽभ्यधायि कविकुलगुरुणा कालिदासेन–

"श्लिष्टा क्रिया कस्यचिदात्मसंस्था
संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव॥ (मा० मि० १/१६)

कालिदासीयमेतद्वचनं गुरुचरणेषु संगच्छतेऽक्षरशः, किन्तु स्वल्पज्ञा अपि राजनीतिनिपुणा यथा धुरि प्रतिष्ठाप्यन्ते न तथा तादृशा मनीषिणो धुरि प्रतिष्ठापिता इति महती विडम्बना स्वतन्त्रभारतस्य पल्लवग्राहिपाण्डित्यचमत्कृतस्याऽऽधुनिकस्य।

गुरुचरणा अन्तेवासिनः सततमध्यापयन्ति स्म। शयनसमये भोजने यात्रायां वा यदा कदापि शास्त्रीयं विषयं प्रष्टु स्वातन्त्र्यमासीदन्तेवासिनां कृते। ते पूज्यपादा लीलयैव शिष्याणां चेतसि शास्त्रीयं रहस्यं सद्य एव संक्रामयन्ति स्म। एकदा मामवादिषुस्ते–"एक मिट्टी का धोंधा दो घड़ा होता है" इति हिन्दीवाक्यं संकृतेऽनुवदेति। तदा मया "एको मृत्पिडः घटौ भवतः" इत्यवादि। तैरभाणि–"गृह्णाति वाचकः संख्यां प्रकृते र्नतु विकृतेः" इति नियमेन "एको मृत्पिण्डो घटौ भवति" इति भाव्यमनुवादेनेति तैरुक्तोऽहम्। ततो मयि तूष्णीभूते तैरवादि यत्तवाऽप्यनुवादः समीचीन एव। "एकः सुवर्णपिण्डः खदिराङ्गारसवर्णे कुण्डले भवतः" इति भाष्यवाक्ये हि विकृत्यनुसारिणी क्रिया। "प्रकृते र्नतु विकृतेः" इति नियमस्तु च्विप्रत्ययविषय इति तत्रैवाह नागेशभट्टः। अतः श्रीहर्षः-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"विभज्य मेरुर्न यदर्थिसात्कृतो
न सिन्धुरुत्सर्गजलव्ययैर्मरुः।
अमानि तत्तेन निजायशोयुगं
द्विफालबद्धाश्चिकुराः शिरस्थितम्।" (नैषध १/१६)

इति श्लोके 'अमानि' इति प्रकृत्त्यनुसारिणीम्,

"कलशे निजहेतुदण्डजः
किमु चक्रभ्रमकारितागुणः।
स तदुच्चकुचौ भवन् प्रभा
झरचक्रभ्रममातनोति यत्॥" (नैषध २/३२)

इत्यत्र च 'भवन्' इति तथाभूतामेव क्रियां प्रयुयोज।

एकदा गुरुचरणा अवोचन् "हे छिन्नमस्ते तुझे नमस्कार है, हे वगले गले की रक्षा करो।" इति वाक्ये अनुवद। मया झटित्येव सगर्वमभाणि –"किमत्र पाण्डित्यम्?" छिन्नमस्ते तुभ्यं नमः, वगले गले रक्ष" इति ह्यनुवादः। तदा तैरवादि सस्मितम्–किं नाहं जाने यदेतद् वाक्यं साहित्याचार्यस्य विद्यार्थी अनुवदिष्यत्येव। एतादृशमनुवादं तु प्रथमाया अपि छात्रः कर्तुं प्रभवति। अतो नासावनुवादः साहित्यिकः। अत एवमनुवदितव्यम् –"छिन्नमस्ते नमस्ते, वगलेऽवगले" इति। एष हि साहित्यिकोऽनुवादः।

एकदा कश्चिच्छात्रो गुरुचरणानवादीद् यदयं छात्रो योग्यतमोऽस्ति। तदा तदीयं गर्वमपाकर्तुं तैरभाणि यदयं' सन्धिमपि न जानाति। पृच्छ तं "अत्राऽऽगच्छ" इत्यत्र कः सन्धिरिति? तदा तेन छात्रेण झटित्युक्तं यदत्र किं पाण्डित्यम्? दीर्घसन्धिरस्ति। श्रीरङ्गेश्वरनाथमिश्रैरवादि यदत्र पररूप सन्धिरस्तीति। इदं कर्णोपकर्णिकया सर्वेषु कामेश्वरसिंहसंसकृतविश्व विद्यालयीयपण्डितनां कर्णेषु गतम्। सर्वे दीर्घसन्धिमेव प्रायः समर्थायामासुः। अन्ते समस्तविद्यावदातान्तःकरणा मिथि-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

लामहीमण्डनायमाना दार्शनिकशिरोमणयोऽवादिषुः कुलानन्दमिश्रा यदत्र पररूपेणैव भाव्यम्। साधुत्वं "ओमाङोश्च" इति सूत्रेणैव भाव्यम्। यत इदम् आङि पररूपं विधत्ते। "अकः सवर्णे दीर्घः" इति करोत्वन्यत्र दीर्घम्।

एकस्मिन् समये वसयानेन गच्छन् गुरुणाऽहमवादि यत् किञ्चिद् वदेति। तदा मयोक्तं यदेतादृशानि वाक्यानि वक्तव्यानि यानि भवेयुर्नानार्थानि। भवन्तः कथयिष्यन्ति, अहं तदर्थान् करिष्यामि। ततः श्रीगुरुचरणैरुक्तानि नैकानि नानार्थानि वाक्यानि तेषां केषाञ्चिन्नैकेऽर्था मया यथाबुद्धिबलमुक्ताः। मया "ननाद" इत्युक्त्वाऽस्य नैकार्थकरणाय गुरवो निवेदिताः। तदा तैरव्यक्तं शब्दं चकारेति अन्तर्भावितण्यर्थत्वे नादयामासेति चार्थद्वयमुक्तम्। मया निवेदितं यदत्र मदभिप्रेतमर्थान्तरमपि वर्तत इति। अन्यमनस्कतया तैरुक्तं यदत्र नास्ति तृतीयोऽर्थः। मयाऽभाणि–अस्ति। तैरवादि अस्ति चेद् वद "पुत्रादिच्छेत् पराजयम्, शिष्यादिच्छेत् पराजयम्।" इति हि सिद्धान्तः। ततः प्रणतेन मयाऽवादि –"न=नहि, ना=मनुष्यः, आद=चखाद=मनुष्य ने नहीं खायां" इति। तदा प्रसन्नतापारावारस्य हृदयगतस्य तरलः तरङ्ग इव तदीयो दक्षिणो हस्तो पपात मन्मस्तके।

लेखनयोग्यतायां सत्यामपि गुरुचरणानां हृदि लेखने तथा रुचि र्नासीद् यथाऽध्यापनेऽध्ययने च। एकदा मगधविश्वविद्यालस्य हिन्दीविभागे प्राध्यापका हिन्दीकवयो मूर्द्धन्यमनीषिणो राजवंशसहायहीरामहाभागा गुरुचरणानवोचन् यत् कोऽपि ग्रन्थो न प्राणायि भवता सकलशास्त्रसागरपारङ्गतेनापि, इति कष्टं वर्तते। तदा सोत्साहं सकटाक्षं सस्मितं चावादिषू रङ्गेश्वरनाथमिश्राः –"चौरो ग्रन्थं लिखति। यो विद्यार्थिनः समयं चोरयति नैकग्रन्थविषयं च चोरयति स एवेदानीं ग्रन्थं प्रणयति। नहि सन्ति सम्प्रति पाणिनिवन्मौलिकग्रन्थकर्तारः। नास्ति साम्प्रतिके संसकृतावनतिकाले ग्रथरचनायास्तथा आवश्यकता यथा ग्रन्थपाठकानां निर्माणस्य। अहं न प्रणयामि प्रणीतवांश्च ग्रन्थं विशिष्टम्,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

किन्तु ग्रन्थपाठकानवश्यमेव रचितवान्। सन्ति नैके शिष्या ये रक्षिष्यन्ति मदीयां कीर्तिमक्षुण्णाम्।''

यथा विद्याया वैशद्यं तथा वपुषोऽप्यासीद् रङ्गेश्वरनाथमिश्राणाम्। वपुषो वैशद्येन औन्नत्येन स्थूलत्वेन दृष्टशिवत्वेन कैलासमनुचक्रु र्गुरुचरणाः। शुभ्रवाससः सोष्णीषा हस्तेन वेत्रयष्टिं धुनाना यदा कुत्रचिद् हट्टे रेलस्टेशने वा गच्छन्तस्तेऽसंस्तुतानामपि दृशो मनश्च झटित्येव समाकर्षन्ति स्म। तदीयां गभीरां मुखाकृतिं विलोक्य विद्यार्थिनो वलिष्ठा अपि उद्दण्डा अपि बिभ्यति स्म। राँचीस्थे संस्कृतमहाविद्यालये 'साहित्यिकजी' इति नाम्ना प्रसिद्धांस्तानागच्छतो वीक्ष्योद्दण्डा अपि विद्यार्थिनः कम्पन्ते स्म। दस्युदुर्वृत्तसमवाये वेत्रप्रहारं न वर्जयन्ति स्म। एकदा केचित् पञ्चनददेशोद्भवाः (पंजाबी) द्वित्रा युवानः कलकत्तानगरे रेलयानेऽन्तः प्रवेष्टुकामान् इमान् निषिद्धवन्तः। तत आकृत्यैव भीता वेत्रप्रहारेण जर्जरीकृतास्ते पलायितवन्तः। रङ्गेश्वरनाथमिश्राणां गणनां मल्लेष्वपि आसीत्।

आकृत्या अज्ञानामसंस्तुतानां कृते भीषणाः सन्तोऽपि हृदा वाचा च विज्ञानां सच्चिदानन्दस्वरूपा आसंस्ते। वाचि भारवेरर्थगौरवं दण्डिनः पदलालित्यं च दरीदृश्येते स्म।

तेषामाध्यात्मिकं जीवनमतीव प्रशस्तमासीत्। जपो मुख्यो यज्ञो बभूव। ''जपात् सिद्धि र्जपात् सिद्धि र्जपात् सिद्धि र्न संशयः'' इति हि बभूव तेषां राद्धान्तः। आसंस्तान्त्रिक्योऽपि सिद्धयः। जडेऽपि विद्यां संक्रामयितुमासीत् सामर्थ्यम्। परोपकारो बभूव जीवनस्य मुख्यं व्रतम्। नैके दीनाश्छात्राः स्वद्रव्यव्ययेन पाठिताः सवृत्तिकाश्च कृताः। स्वपुस्तकान्यपि प्रत्तानि योग्यशिष्येभ्यो बहूनि। सरस्वतीव लक्ष्मीरपि दधौ तेषु करुणातरङ्गितां स्वां दृशम्। कदाचिदर्थकाठिन्यमनुभवन्तोऽपि न तत्यजुः परोपकारव्रतम्। दैवी सम्पन्न जहौ तान् कदाचित्। अभयं स्पष्टमवालुलोके। एकदा शास्त्रचर्चायां कुलानदमिश्रचरणाः

''शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्। विस्रब्धं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

परिचुम्ब्य जातपुलकामालोक्य गण्डंस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।'' इत्यस्य श्लोकस्यार्थमहमेव जानामीत्यवादिषुः सस्मितम्। तदा रङ्गेश्वरनाथमिश्रैरुक्तम् –''अपीति वाच्यम्। अहमपि जानामि। 'लज्जा' इति स्वतन्त्रं पदं वर्तते। लज्जितेत्यर्थः। अतः समानकर्तृकत्वे न क्त्वोऽनुपपत्तिः। व्यभिचारिणः स्वशब्दवाच्यत्वलक्षणो रसदोषोऽपि न। इदमेव वक्तव्यमासीन्न?''

यथार्थवादिता न कदापि तान् मुमोच। प्रायः ''सत्यं ब्रूयात्'' इत्येव बभूव सिद्धान्तः, न तु ''प्रियं ब्रूयात्'' इत्येव। संस्कृतं समजनि जीवनस्य सर्वस्वम्। तैः संस्कृताध्ययनेनात्मा धन्यो मतः। अस्य ग्रन्थस्योपोद्घात एवाऽवादि तैः–

''सरस्वतीप्रसादेन संस्कृतं मम जीवनम्।
संस्कृतं मम सर्वस्वं भवेज्जन्मनि जन्मनि।।'' इति।

एवंविधा रङ्गेश्वरनाथमिश्रा अस्य प्रकाशमानीयमानस्य प्रत्यभिज्ञाप्रदीप ग्रन्थस्य कर्तारः सन्ति। अयं ग्रन्थः कामेश्वरसिंह संस्कृत विश्वविद्यालये प्रकाशनार्थं प्रेषितः स्वयं लेखकेन। किन्तु दशाधिकवर्षेषु व्यतीतेष्वपि नाद्याऽवधि प्रकाशितः। अस्य ग्रन्थस्य पाण्डुलिपिं मया पटालिपुत्रस्थे बी० एन्० महाविद्यालये फीजिक्सविषयस्य प्राध्यापकेभ्यो रङ्गेश्वनाथमिश्रस्य ज्येष्ठपुत्रेभ्योऽधिगता श्रीनरेशनाथमिश्रेभ्यः। ते मह्यं पाण्डुलिपिं सहर्षं प्रादुः। ततोऽस्य ग्रन्थस्य प्रकाशनायाऽनुदानार्थं राष्ट्रियसंस्कृतसंस्थाने देहलीस्थे प्रेषितमावेदनम्। ८०% अनुदानस्य स्वीकृतिर्लब्धा। एतदर्थं निदेशकान् कमलाकान्तमिश्रान् अन्यानधिकारिणश्च प्रति कृतज्ञतां प्रकटयामि। एवं नागप्रकाशकं प्रत्यपि, येन ग्रन्थोऽयं प्रकाशमानीतः।

रङ्गेश्वरनाथमिश्राणां ग्रन्थोऽयं प्रत्यभिज्ञाप्रदीपस्त्रिधा विभक्तोऽस्ति उपोद्घातः, प्रत्यभिज्ञाप्रदीपः, परिशिष्टम्। उपोद्घाते कश्मीरे प्रसिद्धस्य प्रत्यभिज्ञादर्शनस्य सिद्धान्तः सेतिहासः संक्षिप्ताभिः कारिकाभि र्निरूपितः श्रीमतां गुरुगुरूणां सभापति उपाध्यायानां प्रेरणा ग्रन्थरचनाहेतुत्वेनाऽवादि च ग्रन्थकृता। प्रत्यभिज्ञाप्रदीपे उपोद्घातोक्तस्य सिद्धान्तस्य गद्यात्मकं सविस्तरं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विवेचनं वर्तते। परिशिष्टे समेषां भारतीयदर्शनानामास्तिकानां नास्तिकानां दर्शनानां सेतिहासस्य सिद्धान्तस्य श्लोकात्मकं दिग्दर्शनं वर्तते। अन्ते समस्तस्य प्रत्यभिज्ञाप्रदीपस्य भाषाऽनुवादः प्रत्तोऽस्ति। समासेन प्रत्यभिज्ञा सिद्धान्तस्य प्रतिपादकतया वर्तते साम्प्रतिके युगे महत्यावश्यकता लघीयसो ग्रन्थस्यैतादृशस्य।

श्रीरङ्गेश्वरनाथमिश्राणां शास्त्रान्तरीया अपि नैके निबन्धा विविधासु पत्रिकासु प्रकाशिताः सन्ति। तेषु "दशदोषनिराकृतिः" इति निबन्धः साहित्यिकानां कृते नितान्तमुपयोगी वर्तते। अत्र ध्वन्यालोकस्य ध्वनिलक्षणे महिमभट्टेन प्रत्ता दश दोषा युक्त्या प्रामाणिक्या निरस्ताः। काव्यग्रन्था मुक्तकप्रायाः प्रत्यभिज्ञाप्रदीपकृतो लोकोत्तरां कवित्वशक्तिं सूचयन्ति। सन्ति पद्यानि माधुर्यवन्ति। श्रीरङ्गेश्वरेनाथमिश्राः स्वकीयमुपनाम "मधुरेशः" इति चक्रुः। अस्य व्याख्यां स्वयमेव ते कुर्वन्ति स्म–"अहं मधुर-प्रियः, मधुरायां (मथुरायां) सामन्तता (जमींदारी) आसीत्, मधुरं श्लोकं लिखामि, इष्टदेवो मे सर्वमधुरः कृष्णः सराधः। अतो मधुरस्य मधुराया वा ईशो मधुरः श्रीकृष्ण ईशो यस्य वेति 'मधुरेश' इति ममोपनाम वर्तते मधुरेश इति।।" इति।।

आसन्नेतादृशाः प्रकृतग्रन्थकर्तारो रङ्गेश्वनाथमिश्राः। नेदृशा लभ्यन्ते विद्वांसः सम्प्रति। भूयान्नित्यमेवंविधैर्मनीषिभिरलङ्कृता भारतीया भूमिरिति कामये।

"रङ्गेश्वरप्रसादेन संस्कृतं मम जीवनम्।
रङ्गेश्वरो गुरु र्मेऽस्तु कृपालुः प्रतिजन्मनि।।"

इति कामयते विद्वद्वशंवदः--

डॉ० रामकुमार शर्मा
(वरिष्ठ प्राध्यापक)
ज० ना० ब्र० आदर्श संस्कृतमहाविद्यालय.
रामभद्रपुर लगमा
जि०-दरभङ्गा (बिहारः)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उपोद्घातः

लोकेऽपेक्षाविहीनानां कारणत्वं न युज्यते।
तस्माद् घटस्य निर्माणे चक्रादीनामहेतुता॥१॥
कुम्भकारोऽत्र सापेक्षो घटहेतुर्निगद्यते।
अपेक्षा चेतनेष्वेव जातुचिन्न जडे भवेत्॥२॥
कर्मणोऽचेतनत्वेन जगत्कार्ये न हेतुता।
किन्तु दक्षोऽस्य निर्माणे निरपेक्षो महेश्वरः॥३॥
शिवस्य जगदुत्पत्तौ कर्मसापेक्षतैव नो।
अन्यथा पारतन्त्र्याख्यमहापत्तिः प्रसज्यते॥४॥
स्वेच्छयैव स्वशक्त्यैव सर्वभावान्वितं जगत्।
पूर्णस्वातन्त्र्यसम्पन्नः कुरुते परमप्रभुः॥५॥
सर्वे भावाश्च तत्रैव भवन्ति प्रतिबिम्बिताः।
तस्मात्तस्मात्पृथग्भूतं न किञ्चिज्जगतीतले॥६॥
सद्यस्तादात्म्यविज्ञानं परमेश्वरजीवयोः।
शैवसिद्धान्तमार्गेणानुमानेन च सिध्यति॥७॥
नान्योऽस्मि कश्चिल्लोकेऽस्मिन् किन्त्वहं परमेश्वरः।
इत्येवं यो ह्यनुभवः प्रत्यभिज्ञा स उच्यते॥८॥
मुक्त्यादिसिद्धिस्त्वरितं प्रत्यभिज्ञानमात्रतः।
बाह्याभ्यन्तरचार्यणां नात्र किञ्चित्प्रयोजनम्॥९॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शास्त्रेण प्रत्यभिज्ञायाः परमेश्वरतागतौ।
पूर्णकामस्य जीवस्य प्रार्थनीयं न शिष्यते॥१०॥
मायाजालमपाकृत्य स्वप्रकाशात्मसिद्धये।
दृक्क्रियाशक्तिसम्पत्त्यै प्रत्यभिज्ञा प्रदर्श्यते॥११॥
दृश्यमानपदार्थानां लौकिकानां प्रकाशिनी।
ज्ञानशक्तिः समाख्याता शिवस्य परमात्मनः॥१२॥
तथा स्वेच्छावशाल्लोकनिर्माणनिपुणा परा।
सदा सच्छास्त्रनिपुणैः क्रियाशक्तिरुदीर्यते॥१३॥
अन्वयव्यतिरेकेण शिवः कर्ता प्रतीयते।
एकोऽहं बहुरूपः स्यामितीच्छा सृष्टिसाधिका॥१४॥
यथा संकल्पमात्रेण योगिनः साधनादृते।
कुर्वतेऽशेषकार्याणि समुत्पाद्य घटादिकम्॥१५॥
तद्वदिच्छाबलेनैव योगिराजो महेश्वरः।
पूरयत्यखिलं कामं विरचय्य जगन्महत्॥१६॥
नमस्तस्मै नमस्तस्मै शिल्पिने च त्रिशूलिने।
जगच्चित्रं निराधारमसम्भारं वितन्वते॥१७॥
कर्मबन्धनमाप्नोति मायया परमेश्वरः।
स्वेच्छयैव पुनर्मुक्तो मायाया नर्तको नटः॥१८॥
सर्वत्राद्वैतसिद्धान्तप्रचारार्थे कपालभृत्।
सिद्धान्तं प्रत्यभिज्ञाया जनयामास सादरम्॥१९॥
महादेवगिरेरेकशिलाखण्डे ततेऽमले।
सप्तसप्ततिसंख्याकशिवसूत्राङ्कनं कृतम्॥२०॥
तत्प्रचारपरो भूत्वा सुचिरं जीवतादिति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वसुगुप्तः स्वयं सुप्तः समादिष्टः कपर्दिना॥२१॥
त्रिकदर्शनमेवैतत् प्रत्यभिज्ञानदर्शनम्।
जगदीशानसम्बन्धस्तत्र दर्पणबिम्बवत्॥२२॥
भिन्नवद्भासतेऽभिन्नो लोकोऽयं प्रतिबिम्बितः।
एतदाभासमात्रेणाभासवादोऽत्र युज्यते॥२३॥
चिदाख्यशक्तिस्फुरणं जगत्सत्यं न चेतरत्।
तेन नास्त्यत्र सम्बन्धः परिणामविवर्तयोः॥२४॥
भक्तिरेकाकिनी नास्मिन् न शुष्कं ज्ञानमेव तत्।
विहितो विविधैर्यत्नैर्ज्ञानभक्तिसमन्वयः॥२५॥
द्वैतभावभिया भक्तिर्नैव तिष्ठति शाङ्करे।
सिद्धान्ते, त्रिकराद्धान्ते भक्तिस्तु निरपायिनी॥२६॥
शाङ्कराद्वैतसिद्धान्ते मायाऽकस्मात्प्रवर्तते।
स्वेच्छयैवात्र सिद्धान्ते दृष्टान्तोऽत्र दिवाकरः॥२७॥
मेघैरात्मानमाच्छाद्य दिनकृद् भात्यनावृतः।
कोऽन्यथा गगने स्पष्टं मेघमालां प्रकाशयेत्॥२८॥
निष्क्रियत्वान्न्यूनताऽभूद् ब्रह्मणः शाङ्करे मते।
नात्र तद्गन्धलेशोऽपि क्रियाशक्तिप्रभावतः॥२९॥
सम्प्राप्तेऽद्वैतविज्ञाने भक्त्यै द्वैतं प्रकल्प्यते।
अद्वैतादपि तद् द्वैतं मधुरं मञ्जुलं परम्॥३०॥
शिवादिभूमिपर्यन्तं षट्त्रिंशत्तत्त्ववर्णनम्।
सत्समज्ञैर्महाप्राज्ञैः प्रत्यभिज्ञापरैः कृतम्॥३१॥
पश्वादीनां च तत्त्वानां त्रयाणां वर्णनात् त्रिकम्।
त्रैयम्बकं पुनरिदं त्र्यम्बकेन प्रचारितात्॥३२॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्रिकानर्थान्तरेणैव षडर्धमिति कथ्यते।
स्फुरणात्स्पन्दनाम्नेदं दर्शनं शास्त्रपारगैः॥३३॥
प्रत्यभिज्ञादर्शनन्तु प्रसिद्धिं परमां गतम्।
प्रत्यभिज्ञाविचारेण विदुषामिति सम्मतिः॥३४॥
प्रत्यभिज्ञादर्शनस्याऽभवन्मान्या विपश्चितः।
केषाञ्चिन्नामनिर्देशः प्राधान्यात्क्रियतेततराम्॥३५॥
दुर्वासाः प्रथमस्तत्र त्र्यम्बकामर्दकौ पुनः।
श्रीनाथश्च तुरीयोऽभूत् सर्वविद्याविशारदः॥३६॥
त्र्यम्बकोऽद्वैतसिद्धान्ते द्वैते चामर्दको मतः।
द्वैताद्वैताख्यसिद्धान्ते श्रीनाथः कीर्तितो बुधैः॥३७॥
सोमानन्दो महानन्दोः विदुषां प्रतिभावताम्।
वसुगुप्तोऽपि विख्यातो विपश्चित्सु महामतिः॥३८॥
वसुगुप्तस्य शिष्योऽभूत्कल्लटो नाम बुद्धिमान्।
तत्त्ववेत्तोत्पलाचार्यो गुप्तो लक्ष्मणनामभाक्॥३९॥
गुप्तस्य लक्ष्मणस्यैवाभिनवो दर्शनाग्रणीः।
शिष्यो बभूव साहित्यमर्मज्ञोऽभिनवप्रभः॥४०॥
क्षेमराजस्ततो जातस्तथा नारायणो बुधः।
भास्करो रामकण्ठश्च वरदो राजमण्डितः॥४१॥
जयपूर्वरथो योगराजो गोरक्षनामकः।
एवमन्येऽपि विद्वांसो यशोराशिं वितेनिरे॥४२॥

श्रीमद्गुरूपदेशेन ग्रन्थरचना–

बरहेताभिधे ग्रामेऽधिगयामण्डलं महान्।
विद्योतते धर्मरतः श्रीमद्दामोदरः सुधीः॥४३॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

साहित्यरसमर्मज्ञो वैयाकरणकेसरी।
ज्यौतिषे चान्यशास्त्रेषु कृतभूरिपरिश्रमः॥४४॥
परमप्रतिभां यस्य परिषत्सु विपश्चितः।
विलोक्य विमलप्रज्ञा भवन्ति बहुविस्मिताः॥४५॥
विनेयाध्यापने लेखे विद्यावादे सरस्वती।
यस्य विद्वद्वरेण्यस्य सदा सर्वत्र नृत्यति॥४६॥
अधीतिबोधाचरणैः प्रचारेण महामतेः।
यस्य विद्योपयुक्ताऽभून्मगवंशमहामणेः॥४७॥
विश्वनाथसपर्यायाः काशीवासस्य धीमता।
समवाप्तं फलं येन पाण्डित्यं परमाद्भुतम्॥४८॥
मण्डलेशस्य तातेन रमावल्लभशर्मणः।
बालगोविन्दमिश्रेण स्थापिते शारदागृहे॥४९॥
दधपानामकग्रामस्थिते गोविन्दनामके।
स मामध्यापिपत्प्रेम्णा करुणावरुणालयः॥५०॥
ततो वाराणसीं गत्वा लालघट्टे निरन्तरम्।
विरलानिर्मिते रम्ये महाविद्यालयेऽवसम्॥५१॥
श्रीसभापत्युपाध्यायैरहमध्यापितोऽभवम्।
तदाशीराशिभिस्तूर्णं शिक्षास्नेहो व्यवर्धत॥५२॥
महागुरूणामेतेषां सर्वतन्त्रस्वतन्त्रता।
वाराणसेयविद्वद्भिर्निखिलैरनुभूयते॥५३॥
"शास्त्राण्यधीत्य मनसा चिन्तयित्वा पुनः पुनः।
विनेया बहवोऽध्याप्याः किञ्चित्कालादनन्तरम्॥५४॥
बृहती रचना कार्या लव्वी वापि यथामति।
एवं कृते हि विदुषां विद्याकीर्तिर्विवर्धते"॥५५॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वचोभिरेभिर्मधुरैरुपदेशमयैरहम्।
महागुरूणामधुनोपदिष्टो रचनापरः॥५६॥
सरस्वतीप्रसादेन संस्कृतं मम जीवनम्।
संस्कृतं मम सर्वस्वं भवेज्जन्मनि जन्मनि॥५७॥

विद्वद्वशंवदः
श्रीरङ्गेश्वरनाथमिश्र 'मधुरेशः'

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीः

प्रत्यभिज्ञा-प्रदीपः

ध्यायं ध्यायं परां शक्तिं स्मारं स्मारं गुरोर्वचः।
प्रत्यभिज्ञाप्रदीपोऽयं क्रियतेऽद्वैतसंविदे॥१॥

अपेक्षायाश्चेतनधर्मत्वेन तद्विहीनानां कारणत्वं न युज्यते। लोकेऽपि जडत्वेन मृत्तिकायाश्चक्रस्य दण्डस्य वा न घटनिर्माणकार्ये कारणत्वमपितु सापेक्षस्य कुलालस्यैव। अस्त्येव हि कुलालस्य मृत्तिकाद्यपेक्षेति भावः।

एवं जगन्निर्माणेऽचेतनत्वेन कर्मणो न कारणत्वमपि तु ईश्वरस्यैव। परन्तु जगदुत्पादने ईश्वरस्य कर्मसापेक्षताङ्गीकारेऽन्यमुखप्रेक्षितत्वाभावरूपस्य पूर्णस्वातन्त्र्यस्य भङ्गापत्तिः स्यादतो निरपेक्ष ईश्वरः स्वेच्छयैवाकाशादिभावान्वितं जगन्निर्मिमीत इति मन्तव्यम्।

आकाशादिभावाश्च दर्पणे प्रतिबिम्बवत् परमेश्वरात्मन्येवावभासन्ते, यतश्चेतनाचेतनात्मकं निखिलं जगत्परमेश्वरान्न पृथग्भूतं किन्तु तदन्तर्गतमेव।

एवम्भूतस्य परमेश्वरस्य जीवतादात्म्यं स्वानुभवेनानुमानेन शैवागमेन च सिध्यति। अहं स एवेश्वरो नान्य इत्येवं यः साक्षात्कारः स प्रत्यभिज्ञा इत्युच्यते। तेन प्रत्यभिज्ञामात्रेण मुक्तिदेवलोकप्राप्त्यादिसिद्धिः। नैतदर्थं भस्मस्नानादिबाह्यचर्या क्राथनादिकाभ्यन्तरचर्या प्राणायामादिप्रयासश्चावश्यकतां भजन्ते।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

धर्मार्थसाधकव्यापारो विधिः। धर्मो महेश्वरस्तद्रूपो योऽर्थस्तत्साधकस्तत्सामीप्यादिफलको व्यापारः। अयं विधेयत्वाद् विधिशब्देनोच्यते। विधीयतेऽसौ विधिरिति कर्मणि किप्रत्ययः। स च द्विविधः प्रधानभूतो गुणभूतश्च। तत्र प्रधानभूतः साक्षाद्धर्महेतुश्चर्या। सा द्विविधा व्रतं द्वाराणि चेति। तत्र भस्मस्नानभस्मशयनोपहारजपप्रदक्षिणानि व्रतम्। अत्रोपहारो नियमः। द्वाराणि तु क्राथन-स्पन्दनमन्दनशृङ्गारणावितत्करणावितद्भाषणानि। तत्रासुप्तस्यैव सुप्तलिङ्गप्रदर्शनं क्राथनम्। वाय्वभिभूतस्येव शरीरावयवानां कम्पनं स्पन्दनम्। उपहतपादेन्द्रियस्येव गमनं मन्दनम्। रूपयौवनसम्पन्नां कामिनीमवलोक्यात्मानं कामुकमिव यैर्विलासैः प्रदर्शयति तत् शृङ्गारणम्। कार्याकार्यविवेकविकलस्येव लोकनिन्दितकर्मकरणमवितत्करणम्। व्याहतापार्थकादिशब्दोच्चारणमवितद्भाषणम्।

गुणभूतस्तु विधिश्चर्यानुग्राहकोऽनुस्नानादिर्भैक्ष्योच्छिष्टादिनिर्मिता-योग्यताप्रत्ययनिवृत्त्यर्थः। अनुस्नानञ्च स्नानप्रतिनिधिभूतमुदकोप-स्पर्शनाचमनभस्मस्नानादिकम्। व्रतमध्ये पठितं भस्मस्नानं कालत्रये विहितं नित्यम्। इदं भस्मस्नानन्तु नैमित्तिकमिति विशेषः। इति हि पाशुपतं मतम्।

प्रत्यभिज्ञामात्रमिदं सर्वजनसुलभमिति माहेश्वराः शैवागमसिद्धान्तधनाः शश्वत्प्रत्यभिज्ञाशास्त्रमेवाभ्यस्यन्ति। प्रत्यभिज्ञादर्शनानुसारिणो जनाः काश्मीरदेशे निवसन्तीति जनश्रुतिः। प्रत्यभिज्ञाशास्त्रनिर्देशो यथा—

सूत्रं वृत्तिर्विवृतिर्लध्वी बृहतीत्युभे विमर्शिन्यौ।

प्रकरणविवरणपञ्चकमिति शास्त्रं प्रत्यभिज्ञायाः।। इति।। सूत्रे समासतोऽर्थनिर्देशोः वृत्तौ तदन्वयार्थप्रकाशः। विवृतौ पदान्तरेणार्थाभिधानम्। विमर्शिनीद्वये विचाराधिक्यम्। प्रकरणविवरणपञ्चके च क्रमशोशेषशास्त्रार्थोऽस्त्यभिहितः। प्रत्यभिज्ञादर्शनविशिष्टग्रन्थानां तन्महाचार्याणाञ्च नामान्यग्रे प्रदर्शयिष्यन्ते।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत्रेदं प्रथमं सूत्रम्–

कथञ्चिदासाद्य महेश्वरस्य,

दा[१]स्यं जनस्याप्युपकारमिच्छन्।

स[२]मस्तसम्पत्समवाप्तिहेतुं

तत्प्र[३]त्यभिज्ञामुपपाद[४]यामि॥ *॥

महेश्वरस्यानवच्छिन्नप्रकाशानन्दस्वातन्त्र्यपरमार्थस्य कथञ्चित् परमेश्वरेच्छासम्पादितेन परमेश्वराभिन्नगुरुचरणारविन्दयुगलसमाराधनेन दास्यं परमेश्वरस्वरूपभूतपूर्णस्वातन्त्र्यरूपं स्वस्य परमेश्वराभेदानुभव–

---

१. दीयतेऽस्मै स्वामिना सर्वं यथाभिलषितमिति दासस्तस्य भावो दास्यं महाफलं तद्दास्यमितीश्वरस्योत्कर्षः।

२. समस्तसम्पद्योगेन पूर्णता लक्ष्यते, राज्यभोगस्वर्गभवनभोगप्राप्तौ अपि उत्तरोत्तराशंसनीयसम्भवे कः पूर्णतावकाशः। परमत्वे अर्थनीये यतः परमर्थनीयान्तरं नास्ति तस्मिन् परमेश्वरभावे समासादिति किमाशंसनीयं परं स्यादिति तात्पर्यम्।

३. प्रतीपमाभिमुख्येन ज्ञानं प्रकाशः प्रत्यभिज्ञा।

४. यत्र कर्त्रभिप्रायक्रियाफलविवक्षा तत्रात्मनेपदम्। यत्र तु सा नास्ति तत्र परस्मैपदम्। शेषात्कर्तरि परस्मैपदमित्युक्तत्वात्। अस्य तु प्रत्यभिज्ञोपायप्रदर्शकस्य ग्रन्थकर्तुः सतस्तसम्पत्कारणपरमेश्वर-दास्यसमासादनेन परिपूर्णत्वात् स्वपरविभागो गलितस्तेनैव कर्त्रभिप्रायक्रियाफलञ्चोत्सन्नमिति "तत्प्रत्यभिज्ञामुपपादयेऽहं" इति नोपनिबद्धम्। स्वात्मनि किञ्चिदस्य कर्त्तव्यैषणीयत्वाभावात्। परार्थविषयैव वलात्सम्पद्यते इच्छा, स्वसम्पाद्यनियन्त्रितस्य हि परोपकारकरणाभावात् इत्यतो हेतोः परस्मैपदप्रयोगः।

* एतच्छ्लोकाकर्णन–समये च शिष्याणामेतदर्थ–संक्रमणक्रमेणपरमेश्वर तादात्म्य मेवोपजायते तावत्। तथाहि–"जनस्य"

इत्याकर्णनादष्माकं जननमरणपीडितानामयमुपकारमिच्छन् महेश्वरस्य दास्यमासाद्य समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयति' ततश्च तत्प्रत्यभिज्ञामेवंभूतां वयं प्राप्ता एवेति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मिति यावत् आसाद्य आ समन्ताद यथेष्टमुपभोगयोग्यं विधाय जनस्यापि स्वभिन्नस्यापि उपकारं शिवसमीपे करणमिच्छन् समस्तानां सम्पदां समवाप्तेर्हेतुं तस्य महेश्वरस्य प्रत्यभिज्ञां प्रति आभिमुख्येन ज्ञानम् उपपादयामि। उपपत्तिः सम्भवः। सम्भवतीति तत्समर्थाचरणेन प्रयोजनव्यापारेण सम्पादयामीत्यर्थः।

अत्रेदं मर्म–

लोके हि "स एवायं चैत्रः" इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानं प्रत्यभिज्ञेति व्यवह्रियते। इहापि पुराणागमानुमानादिज्ञातपरिपूर्णशक्तिके परमेश्वरे सति स्वात्मन्यभिमुखीभूते तच्छक्तिप्रतिसन्धानेन ज्ञानमुदेति नूनं "स एवेश्वरोऽहम्" इति। इदमेव प्रकृष्टं ज्ञानं प्रत्यभिज्ञा।

तथोपदिष्टं शिवदृष्टौ भगवत्सोमानन्दनाथैः–

एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः।
ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना॥०॥

करणेन नास्ति कृत्यं क्वापि भावनयाऽपि वा।
ज्ञाते सुवर्णे करणं भावनां वा परित्यजेत्॥०॥

प्रत्यक्षादिप्रमाणेन प्रत्यभिज्ञाशास्त्राद् गुरुवाक्याद्वा दृढरूपया प्रति–

पत्त्या साक्षात्कारेण सर्वगते शिवत्वे एकवारं विज्ञाते सति पश्चात् कारणस्य प्रमाणादेर्नावश्यकता, नापि भावनाया इति भावः। वस्तुतः सुवर्णमपि "इदं सुवर्णं" इत्येवं सुवर्णत्वेन यावन्न ज्ञातं तावत्तज्ज्ञानसाधनीभूतनिकषोपलाद्यानीयते। असुवर्णबुद्ध्या प्राप्तस्य परित्यागस्य निवृत्तये "इदं सुवर्णं भावनीयम्" इति भावना चोपदिश्यते। सुवर्णज्ञानोत्तरन्तु न कथमपि तदपेक्षा। नहि रोगविमुक्तौ भेषजमपेक्षते कश्चित्। शिवोऽहमित्यनवरतं चिन्तनं भावना। शिवोऽहमित्येवमात्मनः परमेश्वरलाभे मेरुपर्वतलाभे रत्नसम्पद इव सर्वाः सम्पदोऽनायासं सुसम्पन्ना एव भवन्ति। एवं प्रत्यभिज्ञाशास्त्रबलेन परमेश्वरतालाभे नान्यत्किमपि प्रार्थनीयमवशिष्यते।

तदुक्तमुत्पल-देवाचार्यैः–

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भक्तिलक्ष्मीसमृद्धानां किमन्यदुपयाचितम्।
एतया वा दरिद्राणां किमन्यदपयाचितम्॥०॥इति।

भक्तिः परमेश्वरस्य दास्यं तद्रूपलक्ष्म्या युक्तानां नान्यत्किमपि प्रार्थनीयं भवति सर्वस्वं तैः समवाप्तमिति भावः। तथा तया रहितानामप्राप्त-परमेश्वरदास्यानां नान्यात्किमपि त्याज्यं भवति। सर्वस्वं तैः परित्यक्तमिति भावः। परमेश्वरदास्यं हि सम्पत्तेः परा काष्ठा। तादृशदास्याभावश्चापत्तेः परा काष्ठा इति तात्पर्यम्। सर्वमेतत् समस्तानां सम्पदां समवाप्तेर्हेतुरिति षष्ठीतत्पुरुषसमासपक्षे निगदितम्।

सम्प्रति समस्तानां सम्पदां समवाप्तिर्हेतु र्यस्या इति बहुव्रीहिसमासपक्षे निगद्यते–

बहुव्रीहिसमासे समस्तसम्पत्समवाप्तिरेव प्रत्यभिज्ञायाः कारणमिति सिध्यति। यावन्न स्वस्य नित्यसुखादिविज्ञानं सम्प्राप्तं तावन्न प्रत्यभिज्ञोदेति। यथा लोके वस्तुन्यभिमुखीभूते "स एवायं चैत्रः" इति प्रत्यभिज्ञोदेति, तथा जीवात्मनि परमेश्वरस्वरूपतावलोकनासक्ते तद्दृक्शक्त्याविष्करणेन प्रत्यभिज्ञोदेति 'स एवेश्वरोऽहम्" इति।

यदीश्वरस्वभाव एवात्मा तर्हि किमर्थं प्रत्यभिज्ञाप्रदर्शनमिति चेदत्रोच्यते–स्वप्रकाशतया सततमवभासमानेऽप्यात्मनि मायावशाद् भागेन प्रकाशमाने पूर्णतावभाससिद्धये दृक्क्रियात्मकशक्त्याविष्करणेन प्रत्यभिज्ञा प्रदर्श्यते।

तथा च प्रयोगः–

अयमात्मा परमेश्वरो भवितुमर्हति। ज्ञान[1]क्रियाशक्तिमत्त्वात्। यो

---

१. यया विचित्रतन्वादिकल्पना प्रविभज्यते।
भासनानवभाते च कथं नामप्रकल्पनम्॥
तदस्यान्तः स्थितं भानं ज्ञानशक्तिरहं स्मृता॥०॥
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम्।
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते॥०॥
स्वप्रकाशे निजे धाम्नि भासयेद् भावविभ्रमान्।
भासना च क्रियाशक्तिरिति शास्त्रेषु कथ्यते॥०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यावति ज्ञाता कर्ता च स तावदीश्वरः, प्रसिद्धेश्वरवद् राजवद् वा। आत्मा च विश्वज्ञाता कर्ता च। तस्मादीश्वरोऽयमिति। अयमात्मेत्यादि प्रतिज्ञावाक्यम्। ज्ञानक्रियेत्यादि हेतुवाक्यम्। यो यावतीत्याद्युदाहरण-वाक्यम्। आत्मा चेत्याद्युपनयवाक्यम्। तस्मादित्यादि निगमनवाक्यम्।

प्रतिज्ञादिवाक्यपञ्चकमवयवपञ्चकमिति नैयायिकैर्व्यवहृतं तस्यावयवपञ्चकस्याश्रयणं मायाङ्गीकारवन्नैयायिकमतस्याप्यङ्गीकारादत्र बोध्यम्। अत्र प्रतिज्ञावाक्येन तथा सम्भवः प्रतीयते। अत एव सम्भवतीति तत्समर्थाचरणेन प्रयोजनव्यापारेण सूत्रकृतः प्रत्यभिज्ञोपपादनं संगच्छते।

अयं भावः—

यथा हेमन्ततौ शैत्याधिक्यादध्ययनासमर्थेषु वटुषु पश्चादग्निसन्निधानेनाध्ययनं कर्तुं प्रवृत्तेषु अग्निरध्यापयतीति प्रयुज्यते। तत्राग्नेः प्रयोजकस्य व्यापारोऽध्ययनसमर्थाचरणमेव। तच्चाध्ययनप्रतिबन्धकशैत्यनिवारणरूपम्। तथा च सूत्रकारस्य व्यापारः प्रत्यभिज्ञासम्भवसमर्थाचरणमेव। तच्च प्रत्यभिज्ञा प्रतिबन्धकीभूतविपरीतभावनानिरासरूपम्। प्रतिज्ञादिवाक्यपञ्चकेनात्मनि कर्तृत्वज्ञातृत्वसिद्धावीश्वरस्य विधिनिषेधौ न सम्भवतः।

तदुक्तमुदयाकरसूनुना—

कर्त्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे[१]।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः॥०॥ इति॥

कर्ता ज्ञाता चायं जीवात्मा आदिसिद्धो महेश्वर एव न कदाप्यन्यः। एवं वस्तुस्थितौ को विचारशीलो जीवात्मा नेश्वर इति निषेधं कुर्यात्। तथा स ईश्वरसिद्धिं वा को विदध्यात् यतो हि असिद्धस्यैव सिद्ध्यपेक्षा न सिद्धस्य।

---

१. महेश्वरे माहैश्वर्यं स्वातन्त्र्यरूपम्। तच्च ज्ञानविषयं क्रियाविषयञ्चेत्युभयप्रकारम्। अतो भगवान् ज्ञाता कर्ता च।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रत्यभिज्ञापरमावश्यकता चोदयाकरसूनुना प्रदर्शिता–

किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते॥०॥ इति॥

सदाप्रकाशेन परमेश्वररूपोऽप्ययं जीवात्मा मायावशात्र तथोपलक्ष्यतेऽतो जीवात्मनो मायानिरासपूर्वकं तद्रूपतासिद्धयै स्वगतदृक्-क्रियाशक्तिप्रतिसन्धानेन प्रत्याभिज्ञा प्रदर्श्यते इति भावः।

पुनरप्याह महाचार्य उदयाकरसूनुः–

सर्वेषामिह भूतानां प्रतिष्ठा जीवदाश्रया।
ज्ञानं क्रिया च भूतानां जीवतां जीवनं परम्॥०॥

तत्र ज्ञानं स्वतः सिद्धं क्रिया कार्याश्रिता सती।
परैरप्युपलक्ष्येत तथान्यज्ञानमुच्यते॥०॥

या चैषां प्रतिभा तत्तत्पदार्थक्रमरूपिता।
अक्रमानन्दचिद्रूपः प्रमाता स महेश्वरः॥०॥ इति

जीवच्छब्दोऽत्र जीववाची। सर्वेषां भूतानां प्राणिनां प्रतिष्ठा स्थितिः जीवाश्रयैव। जीवतां प्राणिनां जीवनं चैतन्यञ्च ज्ञानं क्रिया चेति शक्तिद्वयम्। तत्र ज्ञानशक्तिः स्वतः सिद्धा। क्रियाशक्तिस्तु निर्वर्त्यं यत्कार्यं तदाश्रिता सती परेण स्वेन चानुसन्धीयते। तथान्यनिष्ठापि ज्ञानशक्तिरनु सन्धीयते। या चैषां जीवानां ज्ञानशक्तिर्देशकालवस्तुरूपोपाधिवशेन सङ्कुचिता तत्तज्ज्ञेयपदार्थानुसन्धानक्रमेण निरूप्यते स एव प्रमाता महेश्वरः स च क्रमरहितानन्दापरपर्यायचैतन्यरूपः। निरुपाधिकक्रमरहित-शुद्धज्ञानशक्तेर्महेश्वरस्वरूपत्वात्।

सोमानन्दनाथपादैरप्युक्तम्–

सदा शिवात्माना वेत्ति सदा वेत्ति मदात्मना।
घटो मदात्मना वेत्ति वेद्म्यहं च घटात्मना।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नानाभावैः स्वमात्मानं जानन्नास्ते सदाशिवः॥०॥ इत्यादि॥

महेश्वरस्य दासः सदा स्वात्मानं शिवरूपेण जानाति, तथा मदात्मना शिवशक्तिरूपेण च सदा जानातीत्यर्थः।

ज्ञानाधिकारपरिसमाप्तावपि–

तदैक्येन विना नास्ति संविदां लोकपद्धतिः।
प्रकाशैक्यात्तदेकत्वं मातैकः स इति स्थितिः॥०॥

स एव विमृशत्त्वेन नियतेन महेश्वरः।
विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः॥०॥इति॥

सूर्यादिप्रकाशैर्विषयाः प्रकाश्यन्ते इत्येवं यो लोके प्रकाशस्य संविदपरपर्यायस्य मार्गः स तस्य प्रकाशस्य महेश्वरस्वरूपभूतप्रकाशेन सहैक्यादेव नान्यथा। स एकः प्रकाश एवैकः प्रमातेत्युच्यते। स एव च नित्येन विमर्शेन ज्ञानक्रियाशक्त्या महेश्वर इत्युच्यते। विमर्श एव ज्ञानशक्तिः क्रियाशक्तिश्चेति भावः। तत्र प्रकाशरूपता ज्ञानम्। स्वतो जगन्निर्मातृत्वं क्रिया।

तथा च श्रुतिः–

"तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति। सूर्यादीनां स्वतन्त्रः प्रकाशो न भवति किन्तु तस्य स्वप्रकाशस्य महेश्वरस्य भासा दीप्त्या सर्वमिदं विभाति प्रकाशवद्भवतीति श्रुत्यर्थः।

गीतायामप्युक्तम्–

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥०॥ इति॥

क्रियाधिकारेऽपि निरूपितम्–

एष चानन्तशक्तित्वादेवमाभासयत्यमून्।
भावानिच्छावशादेषां क्रिया निर्मातृताऽस्य सा॥०॥ इति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एष महेश्वरोऽनन्तशक्तित्वाज्जगति दृश्यमानान् अमून्भावान् पदार्थान् प्रकाशयति। इयमस्य ज्ञानशक्तिः। तथा स्वेच्छावशाद् या महेश्वरस्यैषां पदार्थानां निर्मातृता सा क्रिया शक्तिः।

उपसंहारेऽपि–

इत्थं तथा घटपटाद्याकारजगदात्मना।
तिष्ठासोरेवमिच्छैव हेतुकर्तृकृता क्रिया॥०॥
तस्मिन् सतीदमस्तीति कार्यकारणतापि या।
साप्यपेक्षाविहीनानां जडानां नोपपद्यते॥०॥

तस्मिन् सतीदं जगदिति कार्यकारणभावोऽचेतने न सम्भवति। तस्मा न्महेश्वर एव जगत्कर्ता। महेश्वरसत्त्वे जगत्सत्तेति कार्यकारणभावोऽत्र बोध्यम्। लौकिकपदार्था अवभासन्ते महेश्वरश्च तानवभासयतीतिरीत्या महेश्वरे प्रयोजक- (हेतु) कर्तृत्वं सिध्यति। घटपटाद्याकरकजगद्रूपेण स्थातुमिच्छोः परमेश्वरस्येच्छैव विश्वकर्तृत्वरूपा क्रिया। "एकोऽहं बहु स्याम्" इत्येवमिच्छाप्रादुर्भाव एव परमेश्वरो रचयति जगद् विचित्रमिति भावः। प्रधानपरमाण्वादीनामपेक्ष। विरहितत्वात्सापेक्षचेतनस्य घटादिकारण-स्यापि जीवस्यासामर्थ्याच्च न जगत्कारणत्वमिति निष्कर्षः।

इच्छामात्रेण जगन्निर्माणे दृष्टान्तः–

योगिनामपि मृद्बीजे विनैवेच्छावशेन यत्।
घटादि जायते तत्तत्स्थिरभावक्रियाकरम्॥०॥इति॥

मृत्तिकां विनैव योगिनामिच्छामात्रेण घटो जायते। एवं बीजं विनैव तेषामिच्छामात्रेणाङ्कुरो जायते इति पुराणेषु प्रसिद्धम्। नचैतद् घटादिकं केवलमाभासमात्रं किन्तु लोकप्रसिद्धघटादिवत् स्थिरं स्वप्रयोजनीभूतजलाहरणादिक्रियाकरणसमर्थञ्च भवति। तथा च जडानां कारणत्वाभावो न केवलमपेक्षाविहीनत्वादेव किन्तु व्यभिचारदर्शनादपीति भावः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नोपादानं विना घटाद्युत्पत्तिरिति योगी त्विच्छया परमाणून् व्यापारयन् संघटयति घटादिकमिति कल्पना तु न युक्ता। यतो योगिना यत्र विलम्बेन कार्यं सम्पादितं तत्र तथा कल्पनाया अवकाशः स्यात्। यत्र तु योगीच्छासमनन्तरं सद्य एव घटदेहादि जायते तत्रावकाशाभावात्तथा कल्पनाऽपि न सम्भवति। वस्तुतस्तु विलम्बेन योगिकृतकार्यकारणभावस्थलेऽप्यनालक्षितस्य परमाणुव्यापारस्य कल्पना व्यर्थैव। नियत्यनुवर्तनोल्लङ्घनपरमस्वतन्त्रश्चेतनो भूरिभगो भगवान् महादेवो विनाप्युपादानं सर्वं विधातुं समर्थ इत्यत्र न काचिदप्यनुपपत्तिः। ब्रह्मा तु नियतिमनुवर्तत एव न तु तदुल्लङ्घने तस्य सामर्थ्यम्। महेश्वरपारतन्त्र्यात्। महेश्वरस्तु पूर्णस्वातन्त्र्ययुक्तो लीलयैव तदुल्लङ्घनमपि कर्तुं प्रभवतीत्यत्र नास्ति विचिकित्सालेशस्याप्यवसरः। नियतिपदेनात्र नियम्यन्ते सौरभादयो धर्मा अनयेति व्युत्पत्त्या पद्मत्वादिरूपो धर्मो गृह्यते। अदृष्टं वा नियतिः।

अत एवोक्तं वसुगुप्ताचार्यैः—

निरुपादानसम्भारमभित्तावेव तन्वते

जगच्चित्रं नमस्तस्मै कलानाथाय शूलिने॥०॥

चित्रनिर्माणकार्ये परमावश्यकमप्युपकरणसमूहं विनैव शून्यप्रदेश एव जगद्रूपं चित्रं कुर्वते कलायाश्चन्द्रषोडशभागस्य जगन्निर्माणशिल्पस्य वा नाथाय स्वामिने शूलिने महैश्वर्ययुक्ताय महेश्वराय नम इत्यर्थः।

ननु प्रत्यगात्मनः परमेश्वराभिन्नत्वे संसारबन्धः कथं भवेदिति चेत्तत्रोक्तं स्पष्टमागमाधिकारे—

एष प्रमाता मायान्धः संसारी कर्मबन्धनः॥

विद्यादिज्ञापितैश्वर्यश्चिद्घनो मुक्त उच्यते॥०॥ इति।

एष प्रमाता मायया ऽन्धः सन्नीश्वरस्वरूपाज्ञानात् कर्मणा बद्ध्यते संसरति च। नूनमीश्वरोऽहमित्याकारकप्रत्यभिज्ञया साक्षात्कृ-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तेश्वरस्वरूपस्तु दृक्क्रियाशक्तिपरिपूर्णो मुक्त इत्युच्यते इत्यर्थः। मायापि परमेश्वरेण स्वेच्छयैव परिगृह्यते इति विशिष्टवेद्यमत्र वेदितव्यम्।

ननु प्रमेयस्य प्रमात्रभिन्नत्वे बद्धमुक्तयोः प्रमेयं प्रति को विशेषः? अत्राप्युत्तरं प्रोक्तं तत्त्वार्थसंग्रहाधिकारे–

मेयं साधारणं मुक्तः स्वात्माभेदेन मन्यते।

महेश्वरो यथा बद्धः पुनरत्यन्तभेदवान्॥०॥ इति।

अयं भावः–

अमृतं विषं वा सुवर्णं लोष्ठं वा साधारणं सर्वं प्रमेयं स्वात्मनः सकाशादभिन्नमिति मुक्तो मन्यते। अत एव महेश्वरवत्तस्यामृते विषे वा सर्वत्र समैव दृष्टिः बद्धस्तु पुनः सर्वं प्रमेयं स्वात्मनः सकाशाद् वस्तुतोऽभिन्नमप्यभेदसाक्षात्काराभावेनात्यन्तभिन्नमिति मन्यते। तथा च तस्य नामृते विषे च समा दृष्टिः।

ननु यथा मृत्सलिलादिसकलसहकारियुक्तत्वे सत्यज्ञातमपि बीजमङ्कुरं समुत्पादयति निश्चयेन तथा स्वयमीश्वरस्वरूपोऽहमित्येवंरूपेणाज्ञानेऽपि जीवस्य वस्तुत ईश्वरस्वरूपत्वात्सदा मुक्तता सिद्धयत्येव। एवञ्च प्रत्यभिज्ञानप्रार्थना व्यर्थैवेति चेदत्रोच्यते श्रूयतां प्रत्यभिज्ञारहस्यम्।

अर्थक्रिया द्विविधा-बाह्या आन्तरा च। बीजस्यार्थक्रिया अङ्कुरोत्पादनरूपा बाह्या। पुत्रजन्मादेरर्थक्रिया चानन्दोत्पादनरूपा आन्तरा। तत्राद्या प्रत्यभिज्ञानं नापेक्षते। द्वितीया तु तदपेक्षत एव। श्रुतमेव पुत्रजन्मादि तत्क्षणमान्तरमानन्दं विधत्ते नाश्रुतं सदपि तत्। तथा चान्तरार्थक्रिया तदुत्पादकस्य प्रत्यभिज्ञाने सत्येव जायते नान्यथेति सिद्धम्। एवमत्र मोक्षाभ्युदयनिमित्तभूतं यद् जीवात्मैक्यं तस्य या प्रयोजनभूता क्रिया सा च दृक्क्रियाशक्तिपूर्णतासम्पादनरूपा। तस्याञ्चाहमीश्वर इत्येवंज्ञानमूलको य आनंन्दः स प्रधानम्। तथा च जीवात्मैक्यं ज्ञातमेव दृक्क्रियाशक्तिरूपचैतन्यस्य पूर्णतां सम्पादयत्सदानन्ददायकं भवतीति जीवात्मैक्यविज्ञानाय प्रत्यभिज्ञा परमावश्यकी।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ननु प्रत्यभिज्ञानेन विनाऽदृष्टा तथान्तरार्थक्रिया सति प्रत्यभिज्ञाने क्व दृष्टा भवतीति चेदत्रोच्यते–

नायकगुणगणसंश्रवणप्रवृद्धानुरागा काचित् कामिनी मदनविह्वला विरहक्लेशमसहमाना मदनलेखावलम्बनेन स्वावस्थानिवेदनानि विधत्ते। तथा वेगात्तन्निकटमटन्त्यपि तस्मिन्नवलोकितेऽपि तदवलोकितं तदीयगुण-परामर्शाभावे जनसाधारणत्वं प्राप्ते हृदयङ्गमभावं न लभते। यदा तु दूतीवचनात्तदीयगुणपरामर्शं करोति तदा तत्क्षणमेव पूर्णभावमभ्युपैति।

एवं स्वात्मनि विश्वेश्वरात्मना भासमानेऽपि तन्निर्भासनं तदीय-गुणपरामर्शविरहसमये पूर्णभावं न सम्पादयति। यदा तु गुरुवचनादिना सर्वज्ञत्वसर्वकर्तृत्वादिलक्षणपरमेश्वरोत्कर्षपरामर्शो जायते तदा तत्क्षणमेव पूर्णतात्मलाभः।

नायकस्य पूर्वं श्रुता ये गुणा रूपवत्त्वादयस्त एवेमे येऽस्मिन् पुरःस्थिते मनुष्ये दृश्यन्ते इत्येवं ज्ञानं यावन्न जायते तावन्नायिकाकर्तृकं तादृशमनुष्यावलोकनमितरजनावलोकनतुल्यमेवेति न तस्या हृद्यं तद्भवतीति निष्कर्षः।

तदुक्तं चतुर्थे विमर्शे–

तैस्तैरप्युपयाचितैरुपनतस्तस्याः स्थितोऽप्यन्तिके।
कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा।
लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो
नैवायं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता॥०॥ इति॥

अत्र उपयाचितैरित्यत्र नपुंसके भावे क्तप्रत्ययस्तेन विविधप्रकारप्रार्थनाभिरित्यर्थलाभः। उपनतः समागतः। एवम्-मया यः प्रार्थितः सोऽयमितिरूपेण। रन्तुमित्यन्तर्भावितण्यर्थम्। रमयितुं नायिकामानन्दयितुमित्यर्थः। प्रभवतीति शेषः। सर्वमन्यत्सुगमम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रत्यभिज्ञादर्शनेतिहासः–

कश्मीरदेशे प्रचलितस्य शैवागमस्य प्रत्यभिज्ञास्पन्द-त्रिकषडर्धत्रैयम्बकप्रभृतीन्यभिधानानि सन्ति। पूर्वं ज्ञातस्य मध्ये अज्ञात इव स्थितस्य वस्तुनः पुनः प्रत्यभिज्ञानमेतद्दर्शनद्वारा भवतीत्येतस्य संज्ञा प्रत्यभिज्ञा इति। परमेश्वरहृदये विश्वनिर्माणार्थं समुत्पन्नायामिच्छायां शिवरूपं शक्तिरूपञ्चेति रूपद्वयं भवति परमेश्वरस्य। शिवः प्रकाशरूपः शक्तिश्च विमर्शरूपिणी। विमर्शश्च "अकृत्रिमाऽहम्" इति स्फुरणमेतत् सृष्टिकाले विश्वाकाररूपेण, स्थितौ विश्वप्रकाशरूपेण, संहारकाले विश्वसंहरणरूपेण च तिष्ठति।

उक्तञ्च पराप्रवेशिकायाम्–

"विमर्शो नाम विश्वाकारेण विश्वप्रकाशेन विश्वसंहरणेन च अकृत्रिमहामिति स्फुरणम्" इति। अन्यत्र चोक्तम् "या स्वस्वरूपविश्रान्तिर्विमर्शः सोऽहमित्ययम्" इति।

अस्यैव स्फुरणस्य स्पन्देत्यपरं नाम तस्मादेतद्वर्णनेन प्रकृतदर्शनस्य स्पन्दसंज्ञा समजनि। पशुपतिपाशरूपाणां त्रयाणां तत्त्वानां प्रधानतयाऽत्र वर्णनेनास्य त्रिकसंज्ञा सार्थकतामुपैति। त्रिकषडर्धयोः समानार्थकत्वं स्पष्ट मेवेति न षडर्धसंज्ञाहेतुप्रदर्शनं परमावश्यकतां भजते। त्र्यम्बकप्रचारितस्य त्रैयम्बकेत्यभिख्या युज्यत एवान्वर्थरूपेण।

तन्त्रालोकटीकायां प्रत्यभिज्ञादर्शनस्याविर्भावक्रमः प्रचारक्रमश्च सविस्तरं वर्णितस्तस्य सक्षिप्ताशयस्त्वित्थम्–

निजपञ्चमुखसमुत्पन्नानां शैवागमानां द्वैतपरकव्याख्यां निशम्य भगवान् परमशिवोऽद्वैतसिद्धान्तप्रचारार्थं प्रत्यभिज्ञासिद्धान्तं समुत्पादयामास, द्वततरं लोके प्रचाराय दुर्वाससमृषिवर्यं समादिदेश च। दुर्वासाश्च त्र्यम्बकामर्दकश्रीनाथनामकान् मानसपुत्रान् समुत्पाद्य क्रमशोऽद्वैत-द्वैताद्वैतदर्शनान्युपदिदेश। ततस्त्र्यम्बकोऽद्वैतमतमिदं प्रचारयामास लोके।

सोमानन्दः त्र्यम्बकवंशजस्त्र्यम्बकादेकोनविंशः खृष्टनवम शतके एवं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वर्णयतीति त्रिकदर्शनस्य प्रादुर्भावकालः पञ्चमशतकं प्रतीयते। पुरा कश्मीरदेशे प्रचलितान् मालिनीविजयस्वच्छन्दविज्ञान भैरवनेत्राद्यनेकशैवागमान् परवर्तिनः प्रत्यभिज्ञामहाचार्याः साम्प्रतिक प्रत्यभिज्ञादर्शनग्रन्थनिचयोपजीव्यानवगच्छन्ति।

श्रूयते श्रीमद्भगवता श्रीकण्ठेन स्वयं स्वप्ने समादिष्टो वसुगुप्तः "महादेवगिरेरेकस्मिन् शिवपल्शिवोपलशिवाशिलाद्त्यनेकनामके विशालशिलाखण्डे विलिखितानि सप्तसप्ततिसंख्याकशिवसूत्राणि समुद्धर लोके प्रचारय च" इति।

ततो वसुगुप्तेन ८०० ई० समीपे स्थितेन शिवसूत्र सिद्धान्तविशदीकरणाय, द्विपञ्चाशत्कारिकाभिः "स्पन्दकारिका" विरचिता। वसुगुप्तकृता श्रीमद्भगवद्गीताटीका वासवी नाम लोकदौर्भाग्यादप्रकाशितैव।

वसुगुप्तस्य शिष्येण कल्लटेन स्पन्दसिद्धान्तितं सोमानन्देन प्रत्यभिज्ञा सिद्धान्तितञ्च मतं विवर्धितम्। उभयोर्यत्र कुत्रचिदेव वैमत्यं न सर्वत्र। दर्शनदृष्टिस्तूभयोस्तुल्यैव। कल्लटस्य सर्वश्रेष्ठकृतिः स्पन्दकारिकायाः वृत्तिः स्पन्दसर्वस्वं नाम। सोमानन्दस्य प्रधानग्रन्थौ शिवदृष्टिः परात्रिंशिका वितृतिश्च।

सोमानन्दस्य शिष्य उत्पलाचार्यः (९०० ई०)

अस्य ग्रन्थाः—ईश्वरप्रत्यभिज्ञाकारिका, ईश्वरप्रत्यभिज्ञावृत्तिः, सिद्धित्रयी, शिवस्तोत्रावली, ईश्वरप्रत्यभिज्ञाविमर्शिनी च। अत्र प्रथमो ग्रन्थः त्रिकसम्प्रदायस्य मननशास्त्रम्। एतद्ग्रन्थरत्ननामाधारेणैवैतद् दर्शनं प्रत्यभिज्ञानाम्ना व्यवह्रियते। सिद्धित्रयीग्रन्थे अजडप्रमातृसिद्धीश्वरसिद्धिसम्बन्ध-सिद्धीनां गणना। शिवस्तोत्ररत्नावलीनामको ग्रन्थो भक्तिरसपरिपूर्णोऽत्युत्कृष्टस्तोत्रसंग्रहः।

उत्पलाचार्यस्य प्रशिष्यो लक्ष्मणगुप्तस्य शिष्यो बभूव अभिनवगुप्तः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

९५०-१०००ई० समये। दर्शनशास्त्रे सरससाहित्ये चायमप्रतिमप्रतिभः। अभिनवभारतीलोचनाभ्यां कृतमस्य नामामरम्।

एतत्कृतयः—ईश्वरप्रत्यभिज्ञाविमर्शिनीव्याख्या, तन्त्रालोकः, तन्त्रसारः' मालिनीविजयवार्तिकम्, परमार्थसारः, परात्रिंशिकाविवृतिः, ईश्वर प्रत्यभिज्ञाविवृतिविमर्शिनी, पर्यन्तपञ्चाशिका, परात्रिंशिकाव्याख्या च।

एवमेव साहित्येऽनन्तकृतयोऽस्य विराजन्ते। अर्धत्र्यम्बकमतस्य प्रधानाचार्योऽयमभिनवगुप्तो विषयान्तरे शम्भुनाथस्य शिष्यो मत्स्येन्द्रनाथसम्प्रदायस्य सिद्धकौलश्चासीत्। शम्भुनाथो लक्ष्मणगुप्तश्चैक एवेति केचित्।

अभिनवगुप्तस्य सुयोग्यशिष्यः क्षेमराजः। एतत्कृतयः—

शिवसूत्रविमर्शिनी, स्वच्छन्दतन्त्रम्, नेत्रतन्त्रस्योद्योतटीका, प्रत्यभिज्ञाहृदयम्, स्पन्दनिर्णयः, स्पन्दसन्दोहः, शिवस्तोत्रटीका च। अस्य स्थितिः ९७५ तमं ई० वर्षात् १०२५ तमं वर्षं यावत् सम्भाव्यते।

एवमन्येऽपि प्रत्यभिज्ञादर्शनस्य विशिष्टग्रन्थाः—

उत्पलवैष्णवस्य—स्पन्दप्रदीपिका। भास्करस्य—शिवसूत्रवार्तिकवृत्तिः। वरदराजस्य—शिवसूत्रवार्तिकम्। रामकण्ठस्य—स्पन्दकारिकाविवृतिः। योगराजस्य—परमार्थसारवृत्तिः। जयरथस्य—तन्त्रालोकव्याख्या। गोरक्ष (महेश्वरानन्द) स्य परिमलसहिता महार्थमञ्जरी। नारायणस्य—तन्त्रसारसंग्रहः। कौण्डिन्यस्य—पाशुपतसूत्रम्।

प्रत्यभिज्ञासिद्धान्तः—

विश्वात्मिकां तदुत्तीर्णां हृदयं परमेशितुः।

परादिशक्तिरूपेण स्फुरन्तीं संविदं नुमः॥०॥ (क्षेमराजस्य)

त्रिकशाक्तदर्शनयोरद्वैतवादात्मिकाऽऽध्यात्मिकदृष्टिः। उभयोरपि मते अद्वयपरमेश्वर एव परमतत्त्वम्। इदमेव शिवशक्त्योः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सामरस्यरूपेणावस्थितं भवति। अयमात्मा चैतन्यरूपो निर्विकाररूपेण भावेष्वशेषेष्वनुस्यूतश्च।

तथा चोक्तं बहुत्र–

चैतन्यमात्मनो रूपं सिद्धं ज्ञानक्रियात्मकम्।
तस्यानावृतरूपत्वात् शिवत्वं केन वार्यते॥०॥
स्वात्मैव सर्वजन्तूनामेक एव महेश्वरः।
विश्वरूपोऽहमिदमित्यखण्डामर्शबृंहितः॥०॥
सर्वथा त्वन्तरालीनानन्ततत्त्वौघनिर्भरः।
शिवः चिदानन्दघनः परमाक्षरविग्रहः॥०॥
इच्छाज्ञानक्रियापूर्वा यस्मात्सर्वाः प्रवृत्तयः।
सर्वेऽपि जन्तवस्तस्मादीश्वरा इति निश्चिताः॥०॥
तत्रात्मन्येव शिवता सर्वस्याखण्डितैव हि।इति॥

स्वात्मैव शिवः चिदात्मा न तु व्यतिरिक्तो वाद्यन्तराभिमत इव। शिवता हि सर्वस्य स्वानुभवसिद्धा। सैव स्वेच्छाविर्भावित मायाप्रमातृतावशात् इदन्ताज्ञानसम्पादितावृतिरिव पुद्गलैरूपलब्धुं न पार्यते। अतस्तद्विज्ञानाय शिवसूत्राणामवतारः।

तथा च शिवसूत्रम्–"चैतन्यमात्मा" इति।

चैतन्यपरसंविदनुत्तरपरमेश्वरपरमशिवादीन्यस्यैवाभिधानानि। द्विधा हि परमशिवः–विश्वात्मको विश्वोत्तीर्णश्च। विश्वात्मकरूपेण भावेषु विद्यमानोप्ययं विश्वोत्तीर्णरूपेण भावातिक्रमणं करोति। विविधविचित्रतासम्वलितमिदं जगत् परमशिवाभिन्नं तदीयस्फुरणमात्रञ्च।

तथा चोक्तं प्रत्यभिज्ञाहृदयसूत्रे–

"श्रीमत्परमशिवस्य पुनः विश्वोत्तीर्णविश्वात्मकपरमानन्दमय प्रकाशैकघनस्याखिलमभेदेनैव स्फुरति न तु वस्तुतोऽन्यत्किञ्चिद् ग्राहकं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वा, अपि तु श्रीपरमशिवभट्टारक एवेत्थं नानावैचित्र्यसहस्त्रैः स्फुरति'' इति।

परमस्वातन्त्र्यशक्तिसम्पन्नः परमेश्वरः विनाप्युपादानसामग्री-माधारमन्तरा च जगच्चित्रं वितनुते। एतदेवास्य कलानाथस्य कलाकौशलं पेशलम्।

तदुक्तं वसुगुप्तैः–

निरुपादानसम्भारमभित्तावेव तन्वते।

जगच्चित्रं नमस्तस्मै कलानाथाय शूलिने॥०॥ इति।

विविधशक्तिसम्पन्नस्यापि परमेश्वरस्य चिदानन्देच्छाज्ञानक्रियेति शक्तिपञ्चकं प्रधानम् चिदाख्या शक्तिः प्रकाशरूपा यया परमेश्वरः स्वतः प्रकाशितो भवति सर्वदा। यया शक्त्या बाह्यभावानपेक्षायामपि परमेश्वरो निरतिशयानन्दमनुभवति स्वातन्त्र्यस्वरूपा सा आनन्दशक्तिः। वेद्यपदार्थसाधारणवित्तिरूपा ज्ञानशक्तिः। सर्वाकारधारणयोग्यता क्रियाशक्तिः। एकोऽहं बहु स्यमित्येवमभिलाषरूपेच्छा शक्तिः। शक्तिभिराभिरेव पञ्चभिरात्मानं स्वभित्तौ जगद्रूपेणोपकरणमन्तरेणैव परमेश्वरः परिणमयति।

त्रिकदर्शनस्याद्वैतवादः शाङ्कराद्वैतवादादप्युत्तमः। शाङ्करसिद्धान्ते विश्वोत्तीर्णसत्यनिर्मलनिर्विकारब्रह्मणि कर्तृत्वं नास्ति, परन्तु त्रिकसिद्धान्ते परमेश्वरे स्वातन्त्र्यशक्तिसम्पन्नता कर्तृता च विद्यते।

त्रिकदर्शनस्यायं स्पष्टतरो भावः–

एकः परमेश्वर एव परमतत्त्वम्। जगदज्ञानमायाः स्वेच्छया परमेश्वरेण गृह्यन्ते। नट इव विविधभूमिकामङ्गीकरोति स्वेच्छयैव परमेश्वरः। परमस्वतन्त्रः स स्वरूपमाच्छादयितुं प्रकाशयितुञ्च समर्थः। अज्ञानन्तु तदीयस्वातन्त्र्यशक्तिविजृम्भणमात्रम्। शाङ्करमते तु मायापरिगृहीतत्वेन ब्रह्मणः पारतन्त्र्यापत्तिः। अतएव शाङ्कराद्वैतवादात् त्रिकदर्शनाद्वैतवादो निर्मलत्वेनाङ्गीक्रियते दार्शनिकसिद्धान्तालोचकप्रवरैर्विद्वद्वरैरशेषैः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्रिकदर्शने जगत्परमेश्वरयोः सम्बन्धो दर्पणबिम्बवत् प्रतिभाति। यथा निर्मलदर्पणे प्रतिबिम्बिता ग्रामनगरवृक्षादयोऽभिन्ना अपि दर्पणात् परस्परं च भिन्नाः प्रतीयन्ते तथा पूर्णसंविद्रूपे परमेश्वरे प्रतिबिम्बितमपीदं जगद्भिन्नमिवावभासतेऽभिन्नमपि। किञ्च लोके बिम्बाश्रिता भवति समुत्पत्तिः। परमेश्वरस्य स्वातन्त्र्यशक्तिरेवात्र हेतुः। अतएवाद्वैतभावना वास्तविकी द्वैतभावना च कल्पिताऽस्ति। एतदाभाससिद्धान्तेनैव त्रिकदर्शनस्य दार्शनिकदृष्टिराभासवादनाम्ना व्यवह्रियते।

तदुक्तमभिनवेनेश्वरप्रत्यभिज्ञाविवृतिविमर्शिनीग्रन्थे–

अन्तर्विभाति सकलं जगदात्मनीह,
यद्वद् विचित्ररचना मुकुरान्तराले।
बोधः पुनर्निजविमर्शनसारयुक्त्या,
विश्वं परामृशति नो मुकुरस्तथा नु॥०॥ इति॥

जगदपि चिदाख्यशक्तिस्फुरणस्वरूपत्वात्सत्यमेव। एवञ्चातात्त्विकान्यथाभावरूपविवर्तवादो न संगच्छते। परिणामवादे च स्वरूपतिरोहितं सद्वस्तु परिणतं भवत्यन्यथाकारेण। परमप्रकाशस्य परमेश्वरस्य प्रकाशे तिरोहिते तु विश्वस्यैवान्धत्वं स्यादतः परिणामवादोऽपि न युज्यते किन्तु स्वातन्त्र्यवाद आभासवादो वा बुद्धिगम्यः प्रामाणिकत्वेनावगन्तव्यः। अतात्त्विकोऽन्यथाभावो विवर्तः। यथा रज्जुः स्वयमविकृता सर्पाकारेण विवर्तते। तात्त्विकोऽन्यथाभावः परिणामः, यथा पयो विकृतमेव दधिरूपेण परिणमति। इति विवर्तपरिणामपरिचयः।

त्रिकदर्शनस्य साधनमार्गः परमवैशिष्ट्यमात्मीयं धत्ते। नात्र केवलं शुष्कं ज्ञानं न वा केवला तादृशी भक्तिः, किन्तु ज्ञानभक्त्योरत्र मञ्जुलं सामञ्जस्यं विराजते। शङ्कराचार्यस्याद्वैतवादे चरमावस्थायां भक्तिर्न तिष्ठति, यतो हि भक्तिर्द्वैतभावनयैव तिष्ठति। त्रिकदर्शने तु भक्तेरपि प्रतिष्ठा। तथाहि–भक्तिर्द्विधा-साधनरूपा साध्यरूपा च। तत्राद्याऽज्ञानमूलतया अनित्या। अद्वैतज्ञानानन्तरं प्रादुर्भूता साध्यरूपा भक्तिस्तु नित्यैव। यो हि साधारणतया मोक्ष अभिधीयते स त्वेतस्या एव नित्यसिद्धज्ञान-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भक्तेरावरणभङ्गजनितः समुन्मेषः। अयमेव त्रिकदर्शने चिदानन्दलाभपदेन व्यवह्रियते।

शाङ्करद्वैतसिद्धान्ते यद्यप्यज्ञानं मीमासितं विद्यते परन्तु यद्वशेन ब्रह्म जीवरूपेण प्रादुर्भवति तदज्ञानं प्रथमं कुतः कथं किमर्थञ्च समुत्पद्यत इति पर्यनुयोगस्य नावलोक्यते सम्यक् समाधिः। अत एवैष सिद्धान्तस्त्रिकदर्शनमहाचार्येभ्यो न रोचते स्वप्नेऽपि।

त्रिकदर्शनाद्वयवादेऽज्ञानमस्ति माया चास्ति, किन्त्वेतत्प्रवृत्तिर्नाकस्मिकी। सर्वस्वतन्त्रः परमेश्वरः स्वेच्छयात्मानं माययाज्ञानेन चाच्छादयति। दृष्टान्तोऽस्त्यत्र स्वप्रकाशो दिवाकरः। यथा सूर्यो मेघैरात्मानमाच्छादयति, परन्त्वाच्छादनवेलायामपि सोऽनाच्छादित एव भवति। अन्यथा को हि मेघान् प्रकाशयेत्।

एषैव दशा मायाज्ञानाभ्यां स्वाच्छादनावसरे परमेश्वरस्य। शाङ्करवेदान्तसिद्धान्ते स्थिता ब्रह्मणः कर्तृत्वाभावरूपा न्यूनता नात्र दर्शने समीक्षितुमुपलभ्यते कदाचित्।

दर्शनेऽस्मिन् ज्ञानक्रिययोः सामान्यम्। कर्तृस्वभावतया ज्ञानमेव तस्य क्रिया। इदमेव ज्ञानभक्त्योः सामञ्जस्यमभिधीयते। जातेप्यद्वैतविज्ञाने भक्तिरुदेतीति प्रागुक्तम्। सैव भक्तिरहैतुकी वास्तविकी वा कथ्यते।

तथा चोक्तं श्रीमद्भागवते–

आत्मारामा हि मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः॥०॥ इति।

बोधसारे नरहरिवचनं यथा–

द्वैतं मोहाय बोधात्प्राक् प्राप्ते बोधे मनीषया।
भक्त्यर्थं कल्पितं द्वैतमद्वैतादपि सुन्दरम्॥०॥
जाते समरसानन्दे द्वैतमप्यमृतोपमम्।
मित्रयोरिव दम्पत्योर्जीवात्म-परमात्मनोः॥०॥इति॥

अयं भावः–

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ज्ञानोदयात् प्राग् द्वैतं मोहं जनयति। सत्यपि ज्ञाने, भक्त्यर्थं स्वबुद्ध्याद्वैतं कल्प्यते। कल्पितमिदं द्वैतममृतायतेऽद्वैतादपि मनोहरञ्च भवति। जीवात्मपरमात्मनोर्मिलनमिदं दम्पत्योर्मिलनमिवातिमधुरं भवति।

शङ्कराद्वैतसिद्धान्ते तु केवलं ज्ञानमेव मुक्तिसाधनमिति साधितमतो दार्शनिकसंसारे त्रिकदर्शनस्य भवति प्रतिष्ठा सुस्थिरा महामान्यैरपि मान्या च। शिवशक्तिसामरस्यमप्यत्र स्फुटम्। तथाहि-

शिवः सदैव शक्तिसम्मिलितः। शक्तिरेवान्तर्मुखावस्थायां शिवः। शिव एव बहिर्मुखावस्थायां शक्तिः। अन्तर्वहिर्मुखावभासश्च सनातनः। शिवतत्त्वे शक्तेरप्राधान्यं शक्तितत्त्वे च शिवस्य। तत्त्वातीतदशायां तु न कयोरपीत्येव शिवशक्त्योः सामरस्यं निष्पद्यते।

तथा चाह सोमानन्दः शिवदृष्टौ-

न शिवेन विना देवी न देव्या च विना शिवः।
नानयोरन्तरं किञ्चित् चन्द्रचन्द्रिकयोरिव॥०॥
शिवः शक्तस्तथाभावान् इच्छया कर्तुमीहते।
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते॥०।इति॥

अन्यत्राप्युक्तम्-

न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी।
न हिमस्य पृथक् शैत्यं नौष्ण्यं बह्नेः पृथग् भवेत्॥०॥
शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते।
शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांश्च महेश्वरः॥०।इति॥

प्रत्यभिज्ञादर्शनस्य शिवतत्त्वं शक्तितत्त्वञ्च त्रिपुरामते कामेश्वरतत्त्वं कामेश्वरीतत्त्वं वैष्णवमते कृष्णतत्त्वं राधातत्त्वं चोच्यते। त्रिपुरासम्मतमेव तत्त्वं सुन्दरी त्रिपुरसुन्दरी, नित्या षोडशिका वा कथ्यते। षोडशिकाभिधाने चन्द्ररूपेणोपासना हेतुः। चन्द्रस्य षोडशी कला नित्या तद्रूपेणोपासनया वेयं षोडशिकाऽभिधीयते। शाब्दिकास्तु तां सर्वस्तुतां वाणीं पश्यन्तीं वदन्ति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

साधकानामन्तिके सुन्दरीयं षोडशवर्षीया सुन्दरी सदा तिष्ठति।

गौडीयवैष्णवमते श्रीकृष्णस्य नित्यषोडशवर्षीयत्वनिर्देशस्यैतदेव रहस्यम्। इयमेव ललिता ललिताम्बिका वा पुंरूपधारणेच्छया श्रीकृष्ण रूपेणावतरति। इयमेवामृतापि। महाकविभवविभूतिर्भवभूतिरिमामेवोत्तररामचरितनामके नाटके स्वकीये नान्दीद्वारा प्रार्थितवान्।

तत्र नान्दी यथा–

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे।

विन्देम देवतां वाचममृतामात्मनः कलाम्॥०॥ इति॥

एवं कविकुलगुरुः कविताकामिनीविलासो महाकविः कालिदासो रघुवंशे महाकाव्ये शिवशक्तिसामरस्यरूपेणैव पार्वतीपरमेश्वरौ मङ्गलकामनया प्रणनाम। तत्र पद्यम्–

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥०॥इति॥

महामहिममहिमभट्टोऽपि व्यक्तिविवेकग्रन्थ इमामेव विमर्शरूपां शक्तिं परां वाचमङ्गीत्य नमश्चकार। नमस्कारपद्यांशो यथा–

"व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्"॥इति॥

अयं भावः–

पराऽपराभेदेन वाग् द्विधा, तत्र पराशब्देन शब्दब्रह्मणोऽपृथग्भूता सूक्ष्मा गुदमेढ्रान्तरालवर्तिमूलाधारचक्रस्था शक्तिरभिधीयते। अपराशब्देन पश्यन्तीमध्यावैखरीतिशक्तयोऽभिधीयन्ते। तदुक्तम्–

वैखरी-शब्दनिष्पत्तिर्मध्यमा स्मृतिगोचरा।

द्योतिकार्थस्य पश्यन्ती सूक्ष्मा ब्रह्मैव केवलम्॥०॥

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥०॥ इति।

अयमत्र निष्कर्षः–

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

षण्णवत्यङ्गुलो देहायामस्तत्राष्टचत्वारिंशत्तममधस्तादुपरि च परित्यज्य मध्ये मूलाधारः। तत्रस्था तत्रस्थपवन संस्कारीभूता शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते। नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते। ततो हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थवाचकस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिग्राह्या मध्यमा वागुच्यते। तत आस्यपर्यन्तमागच्छता वातेन तेनोर्ध्वमाक्रमता च मूर्धानमाहत्य परावृत्त्य च तत्तस्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते।

स्वरूपमथ निर्दिश्यते–

शब्दब्रह्मणः शक्तेः प्रथमो विवर्तः पश्यन्ती, यतः सा शक्तिस्तटस्था सती पराया मध्यमायाश्चावस्थां पश्यतीति, पश्यन्तीत्युच्यते। तत उत्तरं हि "एतत्कथयामि" इति संकल्परूपो मानसिकवर्णोच्चारणक्रमेण द्वितीयो विवर्तो मध्यमा, यतः सा पश्यन्तीवैखरीसंज्ञयोर्वाग्विवर्तयोरन्तरालचारिणीति मध्यमेति निगद्यते। स्थानादिक्रमव्यज्यमानः पदवाक्यात्मकस्तृतीयो विवर्तो वैखरीति कथ्यते। विशिष्टं मुखरूपं खमाकाशं राति गृह्णातीति विखरो वर्णोच्चारस्तस्माज्जाता वैखरीति वैखरीपदव्युत्पत्तिः।

तदाह–

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥०॥ इति।

विवर्तश्चाऽतात्त्विकोऽन्यथाभावः। यथा रज्जुः स्वयमविकृता मायया सर्पाकारेण विवर्तते।

एतल्लक्षणमन्यत्र–

"अतात्त्विकोऽन्यथाभावो विवर्तो विनिगद्यते"॥ इति।

एतेनारम्भवादपरिणामवादयोरविवक्षितत्वमत्र सूच्यते। अतएव च "यतः सर्वं जगदेतद् विवर्तते" इत्याद्युक्तिरप्यन्यत्रत्या संगच्छते। एवञ्च

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

न केवले दर्शनसंसार एवापितु काव्यालङ्कारसंसारेऽपि प्रत्यभिज्ञादर्शन सिद्धान्तसाम्राज्यं समुल्लसतीति धन्या लोकप्रियता प्रत्यभिज्ञादर्शनस्य।

–त्रिकसंज्ञाहेतुपदार्थपरिचयः–

पतिपशुपाशानां वर्णनेन त्रिकसंज्ञाऽस्य दर्शनस्येति प्रागुक्तम्। तत्र पतिः शिवः। पशुः जीवः। पाशो मलकर्ममायारोधशक्तिरूपः। पाशो बन्धनं येन स्वयं शिवरूपोऽपि जीवः पशुत्वमवाप्नोति।

तथा चोक्तम्–

पशुर्नित्योऽह्यमूर्तोऽज्ञो निष्क्रियो निर्गुणोऽप्रभुः॥
स्वाङ्गरूपेषु भावेषु प्रमाता कथ्यते पतिः।
मायातो भेदिषु क्लेशकर्मादिकलुषः पशुः॥०॥ इति।

जीवस्य नैसर्गिकदृक्-क्रियाशक्तेस्तिरोधायकं बन्धनं मलशब्देनोच्यते। मलबन्धनमिदं तुषेण ताम्र-काष्ण्यैन चोपमीयते। यथा धान्याङ्कुरोत्पत्त्यै तुषस्य हेतुत्वं तथा देहाद्युत्पत्त्यै मलबन्धनस्य। यथा ताम्रकालिका रसशक्त्या विवर्तते तथा शिवशक्त्याऽयं मलः।

उक्तञ्च तत्त्वप्रकाशिकायाम्–

एकोह्यनेकशक्तिर्दृक्क्रिययोराच्छादको मलः पुंसः।
तुषतण्डुलवज्ज्ञेयस्ताम्रस्थितकालिकावद् वा॥०॥इति॥

विविधफलार्थिभिर्जीवैः सम्पाद्यमानो धर्माधर्माद्यनादिकार्यकलापः कर्म। जीवप्रलयस्य जीवसृष्टेश्च कारणं माया। जीवस्वरूपस्य तिरोधायिका परमेश्वरशक्ती रोधशक्तिः। द्विनवत्यागमेषु सिद्धानामकमालिनीनामधेयं तन्त्रत्रयं परमं प्रसिद्धमितोऽपि हेतोरेतद्दर्शनस्य त्रिकत्संज्ञाऽवगन्तव्या।

तत्त्वमालाविवरणम्–

तन्त्रालोके तत्त्वलक्षणमुक्तम्–

स्वस्मिन् कार्येऽथ धर्मौघे यद्वापि स्वसदृग्गुणे।
आस्ते सामान्यकल्पेन तननाद् व्याप्तृभावतः।
तत्तत्त्वं क्रमशः पृथिवी प्रधानं पुंशिवादयः॥०॥ इति॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शाक्तशैवागमानुसारं तत्त्वसंख्या षट्त्रिंशत्। तत्र प्रथमं शिवतत्त्वं विद्यातत्त्वमात्मतत्त्वमित्येवं त्रयो विभागाः। शिवतत्त्वेन शिवशक्ती गृह्येते। विद्यातत्त्वे सदाशिवेश्वरशुद्धविद्यानां ग्रहणम्। आत्मतत्त्वे मायादिभूम्यन्तानामेकत्रिंशत्तत्त्वानामन्तर्भावः। तेषां नामानि यथा–

१. शिवः, २. शक्तिः, ३. सदाशिवः, ४. ईश्वरः, ५. शुद्धविद्या, ६. माया, ७. कला, ८. विद्या, ९. रागः, १०. कालः, ११. नियतिः, १२. पुरुषः, १३. प्रकृतिः, १४. बुद्धिः, १५. अहङ्कारः, १६. मनः, १७–२१. ज्ञानेन्द्रियाणि[1] पञ्च, २२–२३. कर्मेन्द्रियाणि पञ्च[2], २७. शब्दः, २८. स्पर्शः, २९. रूपम्, ३०. रसः, ३१. गन्धः, ३२. नभः, ३३. वायुः, ३४. बह्निः, ३५. आपः, ३६. भूमिः। इति।

विश्वनिर्माणेच्छाविर्भावे शिवशक्तिरूपेण परमेश्वरस्य रूपद्वयं भवति। शिवः प्रकाशरूपः शक्तिश्च विमर्शरूपिणी। विमर्शश्च–'पूर्णाऽकृत्रिमाऽहम्' इति स्फुरणम्। विमर्शस्यैव चिच्चैतन्यप्रमास्वातन्त्र्यकर्तृत्वस्फुरत्तासारहृदयस्पन्दमहासत्तापरावागादिसंज्ञाः। प्रमायाअहमंश इदमंशश्चेति विभागद्वयम्। तत्र अहमंशो ग्राहकः शिवः, इदमंशश्च ग्राह्या शक्तिः।

यथा कश्चिन्नृपो निर्मलादर्शे स्वीयं प्रतिबिम्बं प्रसमीक्ष्य निजाननसौन्दर्यं विजानाति तथैव शिवः स्वाधीनामात्मशक्तिं समीक्ष्य स्वाहन्तां प्रकाशमयस्वरूपञ्च परिचिनुते। एवञ्च प्रकाशो विमर्शात्मको विमर्शश्च प्रकाशात्मक इति सिध्यति। इदमेव शिवशक्तिसामञ्जस्यं सर्वत्रागमेषु प्रसिद्धम्।

यथाह शिवदृष्टौ सोमानन्दः–

न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी॥०॥ इति।

शिवशक्त्योरान्तरो निमेषः सदाशिवः। तदीयबाह्योन्मेषश्चेश्वरः।

---

१. ज्ञानेन्द्रियाणि-चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि।

२. कर्मेन्द्रियाणि-वाक्पाणिपादपायूपस्थाख्यानि।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तथोक्तमीश्वरप्रत्यभिज्ञायाम्--

ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः॥०॥ इति।

सदाशिवदशायामचलरूपपरमेश्वरे किञ्चिच्चलनात्मकं स्फुरणं भवति। अतोऽस्य जगतोऽव्यक्तरूपेण भानम्। अत्राहमिति इदमित्यस्य (जगतः) स्पष्टतया एकस्यैवात्मनोंऽशरूपेणात्मनो भिन्नरूपेण चानुभवं करोति। पूर्वविमर्शे अहमित्यस्यात्र विमर्शे इदमित्यस्य च प्राधान्यम्।

विद्या सद्विद्या शुद्धविद्या चेत्यनर्थान्तरम्। ज्ञानस्यात्र दशायां भवत्यहमिदंधियोः समाना स्थितिः। दशायामेतस्यां शिवो विश्वमात्मनो विभवं मनुते। शिवतत्त्वे अहमिति सदाशिवे अहमिदमिति ईश्वरे इदमिदमिति विमर्शः। सर्वेष्वेतेषु प्रथमपदस्यैव प्राधान्यम्। सद्विद्यायान्तु अहमित्यस्य इदमित्यस्य च समप्राधान्यमिति तात्पर्यम्।

अहमिदमोः पृथक्कारिणी शक्तिर्माया। तथा चोक्तम्–

भेदे त्वेकरसे भातेऽहन्तयानात्मनीक्षिते।
शून्ये बुद्धौ शरीरे वा मायाशक्तिर्विजृम्भते॥०॥ इति।

मायावशादहंमशः पुरुषो भवति इदमंशश्च प्रकृतिः। शिवस्य पुरुषरूपप्रादुर्भावाय माया कलाविद्यारागकालनियतिरूपमुपाधिपञ्चकं जनयति। इदमेवोपाधिपञ्चकं शक्तिपरिच्छेदकत्वेन कञ्चुकाभिधानं लभते। तथा चोक्तम्–

कदलीगर्भदलवन्मोदकादिरसादिवत्।
कदम्बगोलवच्चित्रात् कस्मात् कञ्चुकसंभवः॥०॥ इति।

जीवस्य सर्वकर्तृत्वशक्तिसंकोचकं तत्त्वं कला। यद्वशेन जीवः किञ्चित्कर्ता भवति। सर्वज्ञत्वाच्छादिनी जीवस्य विद्या। यत्प्रभावेण किञ्चिज्ज्ञो भवति जीवः। नित्यतृप्तित्वगुणावरको रागः। यद्वशीभूतो जीवो विषयेष्वनुरागं वितनुते। जीवनित्यत्वरोधकः कालः। येन देहादिसम्बद्धो जीवः स्वमनित्यं विजानाति। जीवस्वातन्त्र्यनिरोधिनी नियतिः। यया स नियतेष्वेव कार्येषु प्रवर्त्यते। इयमेव नियतिः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

काव्यप्रकाशकृता श्रीमन्मम्मटभट्टेन कवि–भारतीप्रशंसनप्रकरणे "नियतिकृतनियमरहिताम्" इत्यत्र गृहीता। स्पष्टतयैतेन कश्मीरदेशीयस्य तस्य कश्मीरप्रचलितप्रत्यभिज्ञादर्शनाभिज्ञत्वं सूच्यते।

उपर्युक्तोपाधिपञ्चकरूपकञ्चुकावृतशक्तिर्जीवः पुरुषपदवीमधिरोहिति। त्रिगुणमयमहत्तत्वात्पृथ्वीपर्यन्ततत्त्वानां मूलकारणं प्रकृतिः। महदादि पृथ्वीपर्यन्ततत्त्वानि सांख्यदर्शनरीत्या प्रकृतित एव समुत्पद्यन्ते।

तथा च तद्दर्शनकारिका–

मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न च विकृतिः पुरुषः॥०॥ इति।

प्रकृतेर्नामान्याह–

प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा।
एतानि तस्या नामानि पुरुषं या समाश्रिता॥०॥ इति।

अव्यक्तमपि प्रकृतेरपरं नाम। न विद्यते व्यक्तिरवयवो यस्य तदव्यक्तमिति व्युत्पत्तिः। बहिरिन्द्रियाऽगोचर इत्यर्थः। सर्वभूतानामिदं कारणं स्वयञ्चाकारणम्। नचास्य कारणं किञ्चिदन्यत्किन्तु अविकृतरूपमेवैतदिति तात्पर्यम्। अत एव "मूलप्रकृतिरविकृतिः" इति कारिकांशः संगच्छते। पुनः सत्त्वरजस्तमोलक्षणमष्टरूपञ्च।

तथा चोक्तं श्रीमद्भगवद्गीतायाम्–

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अंहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥०॥ इति।

प्रधानप्रकृतिभिन्नानां सप्तानां मूलप्रकृत्यपेक्षया विकृतित्वं षोडशविकारापेक्षया च प्रकृतित्वमिति सप्त प्रकृतिविकृतयः। भूयोऽस्य जगतोऽस्ति कारणं च तदव्यक्तम्।

सत्वरजस्तमोलक्षणात्तस्मादव्यक्तात्सत्त्वरजस्तमोलक्षण एव बुद्धितत्त्वापरपर्यायो महानुत्पद्यते। उक्तं च सांख्यप्रवचनभाष्ये–

"महत्तत्त्वमिति प्रोक्तं बुद्धितत्त्वं तदुच्यते" इति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शार्ङ्गधरे चोक्तम्–

"प्रकृतिर्विश्वजननी पूर्वं बुद्धिमजीजनत्" इति।

तल्लिङ्गाच्च महतस्तल्लिङ्गोऽभिमानव्यापारलक्षणोऽहङ्कार उत्पद्यते। तल्लक्षणं यथा–

अहमित्यभिमानेन यः क्रियासु प्रवर्तते।

कार्यकारणयुक्तस्तु तदहङ्कारलक्षणम्॥०॥ इति।

स चाहङ्कारस्त्रिविधः–सात्त्विको राजसस्तामसश्च। तत्र सात्त्विकादहङ्काराद्राजससहायात्तल्लक्षणान्येवैकादशेन्द्रियाणि समुत्पद्यन्ते। तानि यथा–श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाग्घस्तोपस्थपायुपादमनांसीति, तत्र पूर्वाणि पञ्च बुद्धीन्द्रियाणि, इतराणि च पञ्च कर्मेन्द्रियाणि, उभयात्मकं मनः। सर्वाणीन्द्रियाणि सत्त्वप्रधानानि भवन्ति, सत्त्वस्यैव प्राधान्यात्, रजसस्तु सहायकमात्रत्वात्। तथा चोक्तं सांख्यकारिकायाम्–

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्॥२॥ इति।

वैकृतात्सात्त्विकादित्यर्थः।

सात्त्विकराजसोभयतः समुत्पत्तेः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणमनांसि सत्त्वप्रधानानि, इतरांणि रजःप्रधानानीत्यन्ये।

"प्राधान्येन व्यपदेशा भवन्ति" इति शास्त्रपद्धतिं लोकव्यवहारसरणिं वानुसृत्याचार्येण तैजस (राजस) सहायाद् वैकारिकाद् (सात्त्विकाद्) अहङ्कारादिन्द्रियाणामुत्पत्तिर्निदर्शिता। वस्तुतस्तु सात्त्विकादहङ्काराद् राजससहायात्तमोमात्रयाऽनुविद्धादेकादशेन्द्रियाणि इति वाच्यम्।

तामसादहङ्काराद् राजससहायात्तमोलक्षणानि पञ्चतन्मात्राणि समुत्पद्यन्ते। अत्रापि पूर्ववत्, सत्त्वमात्रयाऽनुबिद्धादिति वक्तव्यम्। प्राग्वदत्रापि राजससाहाय्यं परमावश्यकम्।

तदुक्तं सांख्यकारिकायाम्–

भूतादेस्तन्मात्रःस तामसः तैजसादुभयम्॥ इति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भूतादेस्तामसादित्यर्थः। तद्यथा–शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति। अनुद्भूतस्वभावानि बहिरिन्द्रियागोचराणि शब्दादीन्येव पञ्च तन्मात्राणि। या मात्रा यस्मिन् तत् तन्मात्रम्।

अत्र वाचस्पतिमिश्रोक्तमिदं बोध्यम्–

यद्यपि रजसो न कार्यान्तरमस्ति, तथापि सत्त्वतमसी स्वयमक्रिये न स्वस्वकार्यं कुरुत इति तदुभयस्मिन्नपि कार्ये सत्त्वतमसोः क्रियोत्पादनद्वारेणास्ति रजसः कारणत्वमिति।

तेषां तन्मात्राणां विशेषा (अभिव्यक्ततया) अनुभवयोग्यैः सुखदुःखमोह–रूपैर्धर्मैर्विशेष्यन्ते इति विशेषाः (स्थूलाः) शब्दादयः, तन्मात्राणि त्वविशेषाणि (सूक्ष्माणि) यतः (अनभिव्यक्ततया) तानि पुनरनुभवयोग्यैः सुखदुःख-प्रभृति-भिर्विशेष्टुं न शक्यन्ते।

तथोक्तं विष्णुपुराणे–

तस्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृता।
तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते॥०॥ इति।

शब्दादयः शब्दस्पर्शरूपरसगन्धा इत्यर्थः। सांख्यकारिकायामुक्तम्–

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च॥०॥ इति।

शान्ता घोराश्च मूढाश्चेति प्रतीकमादाय प्रोवाच वाचस्पतिमिश्रः–

चकार एको हेतौ द्वितीयः समुच्चये, यस्मादाकाशादिषु स्थूलेषु सत्त्वप्रधानतया केचित् शान्ताः सुखाः प्रकाशा लघवः, केचिद् रजः-प्रधानतया घोरा दुःखा अनवस्थिताः, केचित् तमःप्रधानतया मूढा विषण्णाः गुरवः। तेऽमी परस्परव्यावृत्त्या अनुभूयमाना विशेषा स्थूला इति चोच्यन्ते। तन्मात्राणि त्वस्मदादिभिः परस्परव्यावृत्तानि नानुभूयन्ते, इत्यविशेषाः सूक्ष्मा इति चोच्यन्ते इति।

तेभ्यः पूर्वपूर्वतन्मात्रसहायेभ्यः शब्दादितन्मात्रेभ्यो यथासंख्यं व्योमादीनि पञ्च स्थूलानि भूतानि समुत्पद्यन्ते। तद्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यथा—शब्दतन्मात्रादाकाशं शब्दगुणम्। शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः। शब्दस्पर्शतन्मात्रसहिताद् रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणम्। शब्दस्पर्शरूपतन्मात्रसहिताद् रसतन्मात्राच्छब्द-स्पर्शरूपरसगुणा आप उत्पद्यन्ते। शब्दस्पर्शरूपरसतन्मात्रसहिताद् गन्धतन्मात्रादुर्वी शब्दस्पर्शरूपरसगन्धगुणा इति साङ्ख्यतत्त्वकौमुदीकारः। भूतानि व्योमानिलानलजलोर्व्य इति निष्कर्षः।

उक्तमन्यत्र—

महाभूतानि खं वायुरग्निरापः क्षितिस्तथा।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धाश्च तद्गुणाः॥०॥
तेषामेकगुणः पूर्वो गुणवृद्धिः परे परे।
पूर्वः पूर्वगुणश्चैव क्रमशो गुणिसु स्मृतः॥०॥ इति।

गणनेयमुपनिषत्क्रमेण तथा चोपनिषद्वाक्यम्—

"आकाशाद् वायुर्वायोरग्निरग्नेरापोऽद्म्यः पृथिवी" इति।

तत्र सत्त्वबहुलमाकाशं रजोबहुलो वायुः सत्त्वरजोबहुलोऽग्निः सत्त्वतमोबहुला आपः तमोबहुला पृथिवी इति। यथा सुश्रुतः—

"कारणानुरूपं कार्यमिति कृत्वा सर्व एवैते विशेषाः सत्त्वरजस्तमोमया भवन्ति" इति।

मनुनाभिहितं यथा-

मनः सृष्टिं प्रकुरुते चोद्यमानं सिसृक्षया।
आकाशं जायते तस्मात्तस्य शब्दगुणं विदुः॥०॥
आकाशात्तु विकुर्वाणात् सर्वगन्धवहः शुचिः।
बलवान् जायते वायुः स वै स्पर्शगुणो मतः॥०॥
वायोरपि विकुर्वाणाद् विरोचिष्णु तमोनुदम्।
ज्योतिरुत्पद्यते भास्वत् तद्रूपगुणमुच्यते॥०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ज्योतिषश्च विकुर्वाणादापो रसगुणा स्मृताः।
ताभ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः॥०॥

प्रायः सर्वत्र भूतेषु सर्वगुणानां सद्भावेऽपि गुणानामाधिक्येन प्राधान्येन च विभिन्नव्यवहारः सिध्यति। तथाहि–

खंश्रोत्रे स्पर्शने वायुर्दर्शने तेज उत्कटम्।
सलिलं रसने भूमिर्घ्राणे तज्ज्ञैर्निरूपितम्॥०॥
शब्दो वैहायसः स्पर्शो वायवीयः प्रकीर्तितः।
रूपमाग्नेयमाप्योऽत्र रसो गन्धस्तु पार्थिवः॥०॥
अन्योन्यानुप्रविष्टानि सर्वाण्येतानि निर्दिशेत्।
स्वे स्वे द्रव्ये तु सर्वेषां व्यक्तं लक्षणमिष्यते॥०॥ इति॥

एवञ्चाव्यक्तं महत्तत्त्वमहङ्कार एकादशेन्द्रियाणि पञ्च तन्मात्राणि पञ्च महाभूतानि चेति तत्त्वानां चतुर्विंशतिर्व्याख्याता। तत्राव्यक्तं महानहङ्कारः पञ्च तन्मात्राणि चेत्यष्टौ प्रकृतयः। शेषाः षोडश विकाराः। तथोक्तम्–

खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाष्टमः।
मूलप्रकृतिरुद्दिष्टा विकाराश्चैव षोडश॥०॥
बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च।
समनस्काश्च पञ्चार्था विकारा इति संज्ञिताः॥०॥ इति॥

अत्र खादिपदेन सूक्ष्मपञ्चभूतानि गृह्यन्ते। बुद्धीन्द्रियाणां शब्दादयो विषयाः। कर्मेन्द्रियाणां यथासख्यं वचनादानानन्दविसर्गविहरणानि।

यथाह सांख्यकारिकायाम्–

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि।
वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाण्याहुः॥०॥
रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्॥०॥इति।

स्वः स्वश्चैषां महदहङ्कारैकादशेन्द्रियाणां विषयोऽधिभूतं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्वयमध्यात्मम् अधिदैवतं तु-बुद्धेर्ब्रह्मा, अहङ्कारस्येश्वरः, मनसश्चन्द्रमाः, दिशः श्रोत्रस्य, त्वचो वायुः, सूर्यश्चक्षुषः, पृथिवी घ्राणस्य, वचसोऽग्निः हस्तयोरिन्द्रः, पादयोर्विष्णुः, पायोर्मित्रः, प्रजापतिरुपस्थस्येति।

सांख्यकारिकायां सृष्टिक्रममाह–

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।

तस्मादपि षोडशकात्पञ्च पञ्चभ्यः पञ्चभूतानि॥०॥ इति॥

प्रलये तु "यो यस्मान्निःसृतश्चैषां स तस्मिन्नेव लीयते" इत्युक्तदिशा सर्वे स्वकारणेषु विलीना भवन्ति। एवमन्ते अव्यक्तमेवावशिष्यते।

श्रीमद्भगवद्गीतायामप्युक्तम्–

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।

रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके॥०॥

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।

रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे॥०॥इति।

सर्गप्रलयावेवं सततं चक्रवत्परिवर्तेते। सुतरां सिध्यत्येतावता सर्गप्रलययोरनादित्वम्।

प्रत्यभिज्ञादर्शननिर्दिष्टसत्सिद्धान्तविज्ञानपरम्परासम्पत्समवाप्तये कश्मीर देशप्रचलितप्रत्यभिज्ञाशास्त्रविपुलग्रन्थसंग्रहोऽवलोकनीयः। इति शम्।

इति। औरङ्गावादमन्डलान्तर्गत "करहरी" ग्राम-वास्तव्यपण्डितश्री रङ्गेश्वरनाथमिश्रमधुरेशविरचितः प्रत्यभिज्ञा-प्रदीपः समाप्तः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

–परिशिष्टम्–

अथ प्रकरणेऽस्मिन् दर्शनान्तरकथा प्रस्तूयतेः–

अक्षरं ब्रह्म परमं दृश्यते येन यत्र वा।
तज्ज्ञेयं दर्शनं शास्त्रमिति शास्त्रविदां मतम्॥१॥
तापत्रयविनाशाय शश्वत्सुखसमीहया।
सूरिभिर्दर्शनाचार्यैर्दर्शनानि बभाषिरे॥२॥
दर्शनं द्विविधं प्रोक्तं नास्तिकास्तिकभेदतः।
नास्तिकास्तत्र चार्वाकजैनबौद्धाः प्रकीर्तिताः॥३॥
आस्तिको गौतमाचार्यः कणादकपिलौ पुनः।
पतञ्जलिर्जैमिनिश्च वेदव्यासो महामतिः॥४॥
षड्विधत्वञ्च लभते तस्मादास्तिकदर्शनम्।
प्रणेता न्यायशास्त्रस्याचार्यो वै गौतमो मतः॥५॥
वैशेषिकस्य कणभुक् कपिलः साङ्ख्यकारकः।
योगाचार्यो महामान्यैरपि मान्यः पतञ्जलिः॥६॥
मीमांसादर्शनाचार्यो जैमिनिः परिकीर्तितः।
व्यासो वेदान्तसिद्धान्तस्थापने परमप्रभुः॥७॥
पाणिन्यादिमहाचार्यविहितानि धरातले।
दर्शनानि महामोदकराणि प्रतिभान्ति च॥८॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

माहेश्वराणि काश्मीरे सन्ति सन्ति लसन्ति च।
दर्शनीयानि मान्यानि दर्शनानि मनीषिभिः॥९॥

न्यायदर्शनम्–

गौतमस्यापरं नाम अक्षपाद इति स्मृतम्।
तत्कृतं दर्शनं चाक्षपाददर्शननामभाक्॥१॥
गौतमेन प्रतिज्ञातं व्यासं स्वप्नतदूषकम्।
द्रक्ष्यामि चक्षुषा नैव कदाचिदिति मन्युना॥२॥
किञ्चित्काले गते तेन व्यासेनैव प्रसादितः।
विधाय गौतमः पादे प्रेम्णाऽपश्यद्विलोचनम्॥३॥
अक्षपादोऽभवल्लोके तत्प्रभृत्येव गौतमः।
न्यायसिद्धान्तसम्पद्भिर्विश्रुतश्च बहुश्रुतः॥४॥
न्यायदर्शनमप्येतद् द्विविधं परिकीर्त्यते।
प्राच्यनव्यविभेदेन विपश्चित्प्रवरैः समैः॥५॥
प्राच्यं तु गौतमाचार्यप्रणीतं बहुनिर्मलम्।
नव्यञ्च मैथिलोपाध्यायगङ्गेशोपवर्णितम्॥६॥
शताब्द्यां विक्रमार्कस्य द्वादश्यां मिथिलाभिधे।
नव्यन्यायावतारोऽभूद् देशे सर्वमनोरमे॥७॥
प्राक्तनन्यायसूत्राणां गौतमाचार्ययत्नतः।
रचना विक्रमात्पूर्वं चतुर्थशतकेऽभवत्॥८॥
गौतमाचार्यरचितन्यायदर्शनभाष्यकृत्।
वात्स्यायनो विक्रमस्य द्वितीयशतके ह्यभूत्॥९॥
दिङ्नागो बुद्धसंख्यावान् न्यायभाष्यमखण्डयत्।
विगर्वं षष्ठशतके तमुद्योतकरो व्यधात्॥१०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रमाणवार्तिकद्वारा धर्मकीर्तिर्महायशाः।
उद्योतकरसिद्धान्तं स्वधियाऽखण्डयत्पुनः॥११॥
नवमे शतके वाचस्पतिस्तात्पर्यटीकया।
उद्योतकरसिद्धान्तं प्रज्ञाभिश्चान्वमोदयत्॥१२॥
छिन्ना जयन्तभट्टेन विलिख्य न्यायमञ्जरीम्।
चार्वाकबौद्धमीमांसावेदान्तस्थिरसम्मतिः॥१३॥
स्पष्टीचकारोदयनः वाचस्पतिविपश्चितः।
तात्पर्यपरिशुद्ध्याख्यटीकया निर्मलं वचः॥१४॥
दशमे शतके सीताजननेन पवित्रिते।
मिथिलानामके देशे वसतोऽमुष्य संवसन्॥१५॥
न्यायभाष्यकृतो नाम पक्षिलश्च निगद्यते।
पक्षयत्यञ्जसा तत्त्वज्ञानं यः स च पक्षिलः॥१६॥
परिग्रहार्थकात् पक्षधातोर्बाहुलकाद् बुधैः।
पक्षिलस्य तु सिध्यर्थं कर्तरीलज् विधीयते॥१७॥
आन्वीक्षिकी न्यायविद्या पण्डितैः परिकीर्तिता।
अनुमानञ्च अन्वीक्षा तद्विद्यान्वीक्षिकी मता॥१८॥
प्रत्यक्षादागमाच्चापि पश्चाद् या प्रभवत्यसौ।
अन्वीक्षा कीर्तिता लोके अनुमानाभिधानतः॥१९॥
प्रदीपः सवविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥२०॥
यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि।
सा सैव प्रक्रिया साध्वी विपरीता ततोऽन्यथा॥२१॥
अक्षपादप्रणीतो हि विततो न्यायपादपः।
सान्द्रामृतरसस्यन्दफलसन्दर्भनिर्भरः॥२२॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

षोडशे शतके चिन्तामणिं गङ्गेशनिर्मितम्।
दीधित्या भूषयामास रघुनाथशिरोमणिः॥२३॥
तर्कवागीशमथुरानाथश्चिन्तामणेस्तथा।
दीधित्या रचयामास रहस्यं सद्विवेकतः॥२४॥
जगदीशेन रचिता जगदीशी सुविस्तृता॥
शतके सप्तदशके महाचार्येण धीमता॥२५॥
गदाधरेण रचिता व्याख्या गादाधरी तदा।
भट्टाचार्येण सुधिया स्वधिया प्रतिभावता॥२६॥

न्यायसिद्धान्तः—

परमाण्वीश्वरात्माद्या विश्वमूले सनातनाः।
पदार्थाः सन्ति जगतः सत्ता येभ्यः प्रवर्तते॥२७॥
सदेव वस्तुतो लोकैर्दृश्यमानमिदं जगत्।
परमाणुरुपादानं निमित्तं परमेश्वरः॥२८॥
साक्षादनुपलब्धोऽपि सर्वैरेवानुमीयते।
जगन्निमित्तं सततमीश्वरो व्यापकोऽव्ययः॥२९॥
ईश्वरेच्छावशादेव परेण सह सङ्गतः।
द्व्यणुकोत्पत्तिकार्येऽसौ परमाणुः सदा प्रभुः॥३०॥
द्व्यणुकानां च संयोगात् त्र्यणुकोत्पत्तिरिष्यते।
एवं खादिक्रमेणैव सर्वतत्त्वानि जज्ञिरे॥३१॥
न्यायसम्मतनिर्वाणे साम्यावस्थं मनो भवेत्।
सुखदुःखादिरहितं निष्प्रपञ्चं निरन्तरम्॥३२॥

वैशेषिकदर्शनम्—

द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे।
यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुः॥१॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कणाददर्शनं चैतत्तथा चौलूक्यदर्शनम्।
उलूकस्य ऋषेः पुत्र औलूक्यः परिकीर्तितः॥२॥
कपोतवृत्तिं विदधद् रथ्यानिपतितान् कणान्।
तण्डुलानां सुखं खादन् कणभक्ष इति स्मृतः॥३॥
पदार्थान् शिक्षयामास धृत्वोलूकस्य विग्रहम्।
यमीश्वरस्तमौलूक्यं मुनिवर्याः प्रचक्षते॥४॥
प्रशस्तपादरचितं महाभाष्यं विराजते।
व्योमाचार्यकृता टीका तस्य व्योमवती मता॥५॥
वैशेषिकस्य तात्पर्यं बाह्यलोकसमीक्षणे।
पदार्थाः स्वीकृता सप्त श्रीकणादमनीषया॥६॥
कणभुङ्निर्मितं शास्त्रं विक्रमार्कात् पुरातनम्।
एतच्छास्त्रमहाचार्या ग्रंन्थाश्च बहवो मताः॥७॥
विशेषस्य पदार्थस्य विशेषेणोपवर्णनात्।
नाम्ना वैशेषिकं शास्त्रं सार्थकीकुरुते स्वकम्॥८॥

सांख्यदर्शनम्–

न्यायाद्वैशेषिकाद्वापि प्राच्यमेतन्निदर्शितम्।
प्रकारैर्विविधैरत्र द्वैतमेवोपवर्ण्यते॥१॥
सम्बन्धाज्जगदुत्पत्तिः प्रकृतेः पुरुषस्य च।
पुरुषश्चेतनो नित्यं प्रकृतिस्तु जडा ममा॥२॥
सत्कार्यवादसाम्राज्यं दर्शनेऽस्मिन् समीक्ष्यते।
समृद्धं सर्वतस्तस्मान्नान्यवादोऽत्र युज्यते॥३॥
कारणेऽव्यक्तरूपेण सदा कार्यं विराजते।
तदेव जातुचिद् कार्यं व्यक्तरूपेण भासते॥४॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

साम्यावस्था च प्रकृतिर्गुणानां गदिता बुधैः।
वैषम्ये समनुप्राप्ते जगदेतत् प्रवर्तते॥५॥
जायते धीषणातत्त्वं प्रकृतेः पुरुषस्य च।
योगात्तस्मादहङ्कारस्त्रिगुणः समपद्यत॥६॥
सत्त्वप्रधानाहङ्कारादिन्द्रियाणि भवन्ति हि।
तन्मात्रास्तामसात्तस्मात्ततो भूतसमुद्भवः॥७॥
उभयत्रापि साहाय्यं रजसो विनिवेदितम्।
नाहङ्कारेऽन्यथा स्पन्दः संभवेत् सृष्टिसाधने॥८॥
धन्योऽयं कपिलाचार्यः सांख्यशास्त्रप्रवर्तकः।
महोग्रतेजसां राशिर्महामान्यो मनीषिभिः॥९॥
प्रकृतिः पुरुषश्चैव नित्यौ सांख्ये प्रकीर्तितौ।
पुरुषा बहवो मूलप्रकृतिस्त्रिगुणात्मिका॥१०॥
महदाद्याः प्रकृतयस्तथा विकृतयो मताः।
सप्तैव, षोडशमिता विकाराश्च प्रकीर्तिताः॥११॥
चतुर्विंशतितत्त्वानि सांख्ये प्रोक्तानि सूरिभिः।
पुरुषः प्रकृतिर्नैव न चापि विकृतिर्भवेत्॥१२॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
मोहात्कर्तारमात्मानमकर्त्तारं च विन्दति॥१३॥
निर्लेपः पुरुषो ज्ञात्वा प्रकृतिं विश्वमोहिनीम्।
मुक्तो भवति विज्ञोऽसौ प्रकृतिर्विजहाति तम्॥१४॥
द्वैतसिद्धान्तनिष्णाता ईश्वरे मौनमाश्रिताः।
व्यक्ताव्यक्तज्ञविज्ञानविज्ञाः सांख्याः प्रकर्तिताः॥१५॥
कपिलस्य मुनेर्ग्रन्थद्वयं समुपलभ्यते।
सांख्यप्रवचनं तत्त्वसमासश्चापि विश्रुतः॥१६॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कपिलस्य मुनेः शिष्यः स आसीदासुरिर्मुनिः।
यस्य शिष्यः पञ्चशिखः षष्टितन्त्रकरोऽभवत्॥१७॥
विदुषेश्वरकृष्णेन रचिता सांख्यकारिका।
या प्राचीनतरा ख्याता सांख्यशास्त्रस्य कारिका॥१८॥
यस्याष्टीका सांख्यतत्त्वकौमुदीनामिका कृता।
श्रीवाचस्पतिमिश्रेण प्रसिद्धा सांख्यबोधिनी॥१९॥
वृत्तिस्तु सांख्यसूत्राणामनिरुद्धेन निर्मिता।
सांख्यप्रवचनभाष्यं तु कृतं विज्ञानभिक्षुणा॥२०॥

योगदर्शनम्–

सांख्यप्रवचनमित्येव योगनामापरं स्मृतम्।
इदं सेश्वरमाख्यातं सांख्यशात्रं निरीश्वरम्॥१॥
प्राक्तनं सर्वतो रम्यं योगदर्शनमीरितम्।
नाथाभिधे सम्प्रदाये प्रचारोऽस्य विशेषतः॥२॥
हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः।
योगोपदेष्टा भगवान् प्रियंयोगः पतञ्जलिः॥३॥
चित्तवृत्तिनिरोधस्तु योगः प्रोक्तो महर्षिभिः।
ब्रह्मज्ञानं तु साष्टाङ्गयोगादेवोपजायते॥४॥
सांख्यदर्शनतुल्यस्तु ज्ञानांशोऽस्यास्ति वर्णितः।
सर्वतो निर्गुणः शान्त ईश्वरोऽप्यत्र वर्णितः॥५॥
योगशास्त्रं समाख्यातं सांख्यशास्त्रस्य पूरकम्।
क्लेशकर्मविपाकादिरहितेश्वरवर्णनात्॥६॥
पतञ्जल्युपदिष्टस्य योगसूत्रस्य सन्मतिः।
व्यासो मुनिस्तु कृतवान् योगभाष्यमतिप्रियम्॥७॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

टीका वैशारदी रम्या योगभाष्यस्य सूरिणा।
श्रीवाचस्पतिमिश्रेण रचिता विदुषां प्रिया॥८॥
सर्वदर्शनतत्त्वज्ञश्रीमद्विज्ञानभिक्षुणा।
योगदर्शनसर्वस्वं रचितं योगवार्तिकम्॥९॥

मीमांसादर्शनम्–

वैदिकेषु विधानेषु विरुद्धेषु परस्परम्।
विरोधपरिहाराय मीसांसादर्शनं कृतम्॥१॥
प्रधानं वस्तु कर्मैव संसारेऽस्मिन्न चेतरत्।
यज्ञादिकर्म फलदं जैमिनिर्मुनिरब्रवीत्॥२॥
मीमांसकानां सिद्धान्ते शब्दानां नित्यता मता।
शब्दार्थज्ञानलाभाय मीमांसाशास्त्रसंविदः॥३॥
प्रतिभाप्रतिमस्याभूत्प्रसिद्धयशसोऽमलः।
वादोऽन्विताभिधानाख्यः प्रभाकरमहामतेः॥४॥
कुमारिलस्य भट्टस्य वादो ह्यभिहितान्वयः।
शब्दार्थप्रतिपत्तिसिद्ध्या आवश्यक उदाहृतः॥५॥
मीमांसादर्शने बौद्धकृताक्षेपाः निराकृताः।
सर्वाधिकानि सूत्राणि भान्ति गाम्भीर्यवन्ति च॥६॥
विक्रमात्प्राक्तनं शास्त्रमिदं बोध्यं सुविस्तृतम्।
शबरस्वामिना भाष्यमङ्कितं शाबराख्यकम्॥७॥
वृत्तिकृच्चोपवर्षोऽभूत्सर्वविद्याविशारदः।
प्रेम्णा प्रयत्नबाहुल्यात्समाराधितशारदः॥८॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भाट्टमाद्यं गुरोः[१] पश्चान्मुरारेस्तदनन्तरम्।
मतमत्र समुद्दिष्टं सर्वलोकोपकारकम्॥९॥
कुमारिलस्तु प्रथमं द्वितीयश्च प्रभाकरः।
प्रावर्तयन्महाप्राज्ञो मुरारिर्मतमन्तिमम्॥१०॥
कुमारिलस्य शिष्येण मिथिलामण्डनेन च।
मान्यमण्डनमिश्रेण रक्षिता भाट्टसम्मतिः॥११॥
शिष्यो विपश्चिदुम्बेको द्वितीयोऽभूदनन्तधीः।
कुमारिलस्य भट्टस्य भवभूतिपराभिधः॥१२॥
मिश्रोपाह्वः खण्डदेवो द्वितीयः पार्थसारथिः।
तृतीयो माधवाचार्यः सायणाचार्यपूर्वजः॥१३॥
भाट्टसिद्धान्तसन्मार्गमूलतत्त्वविशारदाः।
त्रय एते समाख्याता बहवोऽन्येऽप्रधानतः॥१४॥
कुमारिलस्य शिष्योऽयं पूर्वमासीत्प्रभाकरः।
विचित्रकल्पनाशक्त्याभूद्गुरुस्तस्य धीमतः॥१५॥
मतिमान् शालिको नाथः गुरुसिद्धान्तदर्शकः।
रचितानेन रम्या प्रकरणाद्या च पञ्चिका॥१६॥
गुरोर्मतात्पृथक् भाट्टसम्मतेश्च मतं मतम्।
मुरारेस्तेन लोकेऽध्वा तृतीयोऽभूज्जनश्रुतौ॥१७॥

---

१. गुरुमतमेव प्रभाकरमतमित्युच्यते। प्रभाकरस्य गुरुनामप्राप्तौ कारणं त्वित्थं श्रूयते—अत्र तु नोक्तम्। तत्रापि नोक्तम्। अतः पौनरुक्त्यमितिफक्किकां दृष्ट्वा उभयत्रापि नोक्तमतः कथं पौनरुक्त्यम्-इत्येवं प्रभाकरगुरोः संशये समुत्पन्ने सति तत्परोक्षं तत्पुस्तके तुना (तुशब्देन) अपिना (अपिशब्देन) इति पदच्छेदः प्रभाकरेण कृतः। तुशब्देनापिशब्देन चोक्तत्वात्पौनरुक्त्यमिति तात्पर्यम्। पदच्छेदं दृष्ट्वा सद्योनिवृत्तसंशयेन चकितचेतसा गुरुणा केनायं पदच्छेदः कृत इति पृष्टे प्रभाकरेण कृत इतीतरे शिष्या जगदुः। ततो गुरुः प्रभाकरं त्वमेव गुरुरित्युक्त्वा गुरुनाम्ना आहूतवानिति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वेदान्तदर्शनम्–

वेदान्तदर्शनं सर्वदर्शनश्रेष्ठमुच्यते।
यत्र ब्रह्मविचारोऽस्ति निःश्रेयसविधायकः॥१॥
विद्या तु द्विविधा प्रोक्ता परा चैवाऽपराभिधा।
विद्याऽपरान्यशास्त्रीया वेदान्तीया परा मता॥२॥
वेदस्य अन्तः सिद्धान्तो वेदान्तः परिकीर्तितः।
व्यासेन पाणिनेः पूर्वं ब्रह्मसूत्राणि चक्रिरे॥३॥
शङ्करो भास्करो रामानुजो मध्वश्च वल्लभः।
विज्ञानभिक्षुः श्रीकण्ठः श्रीपतिर्दर्शनाग्रणीः॥४॥
निम्बार्को ब्रह्मविद्विज्ञो बलदेवो महामतिः।
दशैते भाष्यकर्तारोः वेदान्तस्य प्रकीर्तिताः॥५॥

शाङ्करसिद्धान्तः–

मायावशाज्जगत्सृष्टिर्विश्वं मायिकमुच्यते।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः॥६॥
मायाविशिष्टं सगुणं जगत्कर्त्तृ निगद्यते।
निर्गुणं तद्विरहितं सच्चिदानन्दरूपभाक्॥७॥
मुक्तिर्ज्ञानादृते नैव जातुचित्समवाप्यते।
कर्मसंन्यास औचित्यं भजते मुक्तिसिद्धये॥८॥
एवं शाङ्करसिद्धान्तेऽद्वैतवादः प्रशस्यते।
विपश्चित्सम्मतोऽशेषजीवब्रह्मैक्यभावतः॥९॥

भास्करसिद्धान्तः :–

भेदादभेदाज्जीवस्य ब्रह्मणश्च परस्परम्।
वादो भास्करसिद्धान्ते भेदाभेदाभिधः स्मृतः॥१०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रामानुजसिद्धान्तः—

सदा ब्रह्मास्ति सगुणं निर्गुणं न कदाचन।
ब्रह्मणो जीवजगती भवतस्तु विशेषणे॥११॥
विविष्टाद्वैतवादोऽयं रामानुजमते मतः।
विशेषणविशिष्टत्वादेकत्वाच्च यतोऽमले॥१२॥

मध्वसिद्धान्तः—

मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम्।
मध्व आनन्दतीर्थः स्यात् तृतीया मारुती तनुः॥१३॥
मध्वगेहाभिधानस्य पुत्रोभून्मध्वमन्दिरः।
पूर्णा प्रज्ञा स्थिता चास्मिन् पूर्णप्रज्ञस्ततः स्मृतः॥१४॥
आनन्दतीर्थो मध्वश्च पूर्णप्रज्ञस्तथैव च।
मध्वमन्दिर इत्येतन्मध्वनामचतुष्टयम्॥१५॥
हनूमान् प्रथमो भीमो द्वितीयोऽद्भुतपौरुषः।
वायोस्तृतीयो मध्वोयं वतारः परिकीर्तितः॥१६॥
ईश्वरस्य च जीवस्य सदा भेदोऽभिधीयताम्।
जगन्निमित्तं विश्वेशो नोपादानं कथञ्चन॥१७॥
मध्वसिद्धान्तवादोऽयं द्वैतवादो निगद्यते।
शाङ्कराद्वैतसिद्धान्ताद्विपरीतमिदं मतम्॥१८॥

वल्लभसिद्धान्तः—

यथा शाङ्करसिद्धान्ते मायावादोऽपि विद्यते।
न तथा वल्लभमते मायावादो नियुज्यते॥१९॥
अन्यत्समानं सकलं विज्ञयोरुभयोरपि।
शुद्धाद्वैताख्यको वादस्तस्माद् वल्लभसम्मतः॥२०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विज्ञानभिक्षुसिद्धान्तः–

अविभागाद्वैतवादो मतेऽस्य परिकीर्तितः।
वादनाम्नैव सिद्धान्तविज्ञानं भाति निर्मलम्॥२१॥

श्रीकण्ठसिद्धान्तः–

शैवपूर्वोऽस्य वादोऽयं विशिष्टाद्वैतसंज्ञकः।
रामानुजमतादत्र शिवभक्तिर्विशिष्यते॥२२॥

श्रीपतिसिद्धान्तः–

वीरशैवादिरस्यापि विशिष्टाद्वैतसंज्ञकः।
वादो विराजते नित्यं शिवभक्तिविभूषितः॥२३॥

निम्बार्कसिद्धान्तः–

भेदोऽस्ति जीवेश्वरयोर्व्यवहारे न सर्वदा।
द्वैताद्वैताभिधो वादस्तस्मादत्र प्रवर्तते॥२४॥

बलदेवसिद्धान्तः–

बलदेवस्य चैतन्यसम्प्रदाये विभासते।
अचिन्त्यभेदाभेदाख्यो वादो वादेषु नूतनः॥२५॥
सिद्धान्तेऽचिन्त्यरूपेण भिन्नौ जीवेश्वरौ मतौ।
भूयोऽभिन्नौ सतोऽमुष्य तस्मात्प्रत्यग्रपद्धतिः॥२६॥

चार्वाकदर्शनम्ः–

चार्वाका नास्तिकाः ख्याता वेदनिन्दापरायणाः।
अधिभूतसुखासक्ता जडा देहात्मवादिनः॥१॥
चार्वाकदर्शनाचार्य आसीत्कश्चिद् बृहस्पतिः।
प्रत्यक्षंमात्रविश्वासो नास्तिको वेदनिन्दक॥२॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चार्वाकनाम्ना दैत्येन दर्शनं तत्प्रचारितम्।
अतस्तस्याभवन्नाम चारु चार्वाकदर्शनम्॥३॥
यदीयचारुवाक्येन संक्षिप्तेनापि सत्वरम्।
जनाः सर्वे समाकृष्टाः स चार्वाकोऽभिधीयते॥४॥
लोकायतेति संज्ञाऽभूत् चार्वाकस्यैव धीमतः।
लोके तदीय सिंद्धान्तप्रचारात्प्रचुरात्पुरा॥५॥
जीवनस्यान्तिमं ध्येयं लौकिकं सुखमेव हि।
नैवेश्वरो मतेऽमुष्य परलोककथा वृथा॥६॥
भूवारितेजःपवनैर्भूतैरेवोपजायते।
जगद्विचित्रं चैतन्यं भूतसंयोगमात्रतः॥७॥
आत्मा शरीरं चैतन्यविशिष्टं, न परो मतः।
स्वभावाज्जगदुत्पत्तिस्तद्विनाशश्च जायते॥८॥
केवलं मरणं मोक्षः पापं नैव कथञ्चन।
स्वभाववादो विज्ञेयो दर्शनेऽस्मिन्ननीश्वरे॥९॥
वेदाश्च रचिता धूर्तैर्वञ्चकैश्च त्रिदण्डिभिः।
जीविकारक्षणायैव कर्मकाण्डव्यवस्थितिः॥१०॥
सुखमेवास्ति सर्वस्वं ललनालिङ्गनोद्भवम्।
घातजातव्यथाजन्यं दुःखं निरयनामभाक्॥११॥
शरीरमात्मा स्थूलोऽहमिति लौकिकवाक्यतः।
विनाशश्च शरीरस्य मुक्तिरित्यभिधीयते॥१२॥
प्रमाणमेकं प्रत्यक्षं दर्शनेऽस्मिन् प्रकीर्तितम्।
स्वातिरिक्तानि भूतानि चैतन्यं भूतयोगतः॥१३॥
नचैवास्तीश्वरः कश्चित्स्वभावाल्लोकसम्भवः।
वर्णानामाश्रमाणाञ्च व्यवस्था निष्फला मता॥१४॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पशुर्यज्ञहतः स्वर्गं यदि गच्छति सत्वरम्।
तदा कस्मान्न जनकः स्वर्गलाभाय हन्यते॥१५॥
याति जीवोऽपरं लोकं यदि देहाद् विनिर्गतः।
पुनरायाति नो कस्माज्जातुचित् प्रेमविह्वलः॥१६॥
यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥१७॥

जैनदर्शनम्:–

जैनदर्शनमाख्यातं प्राचीनं बौद्धदर्शनात्।
शास्त्रेऽस्मिन्नर्हतो भिन्नं नास्ति ब्रह्म न वेश्वरः॥१॥
अहिंसा परमो धर्मो जैनदर्शनसम्मतः।
पिपीलिकाया हत्याऽपि ब्रह्महत्यासमा स्मृता॥२॥
जैनास्तीर्थङ्करा आसन् चतुर्विंशतिसंख्यकाः।
विख्याता धर्ममर्मज्ञा जैनधर्मप्रचारकाः॥३॥
आद्यस्तीर्थङ्करो विज्ञो जैनधर्मप्रवर्तकः।
अभूदृषभदेवाख्यो मुनिधर्मपरायणः॥४॥
अन्तिमौ द्वावतिख्यातौ पार्श्वनाथाभिधस्तथा।
महावीराभिधश्चापि जैनधर्मोपदेशकौ॥५॥
भद्रबाहुः सिद्धसेनो हरिभद्रस्तथैव च।
हेमचन्द्रः प्रभाचन्द्रो जैनदार्शनिका मताः॥६॥
जैनधर्मस्य सिद्धान्तभाषा ज्ञेयोऽर्धमागधी।
श्रद्धाज्ञानचरित्रैश्च मुक्तिः करतलस्थिता॥७॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ।
सद्यश्चरित्रलाभाय युक्तैर्युक्ततमा मताः॥८॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सच्चरित्रपवित्रेऽस्मिन्नुपास्ये जैनदर्शने।
सप्तभङ्गीनयो नित्यं स्याद्वादश्च विराजतः॥९॥
स्यादित्ययं निपातोऽस्ति सदाऽविश्वासवाचकः।
इदमीदृशमेवेति न जिनस्य मतिः स्थिरा॥१०॥

बौद्धदर्शनम्:-

शकाब्दारम्भतः पूर्वं सप्तमे शतकेऽजनि।
बुद्धदेवो महाप्राज्ञो बौद्धधर्मप्रवर्तकः॥१॥
सिद्धार्थस्तस्य नामासीत् पिता शुद्धोदनोऽभवत्।
माया देवी च जननी भार्या ख्याता यशोधरा॥२॥
तत्र बौद्धाश्च चत्वारो मता सौत्रान्तिकाभिधाः।
योगाचारास्तथा माध्यमिका वैभाषिकाख्यकाः॥३॥
प्रधानशिष्याश्चत्वारो बुद्धदेवस्य वर्णिताः।
बुद्धदेवोपदेशस्तु तेषां मध्ये पुराऽभवत्॥४॥
"क्षणिकं क्षणिकं सर्वं दुःखं दुःखं स्वलक्षणम्।
स्वलक्षणं सर्वभावं शून्यं शून्यं विचारयेत्"॥५॥
अभावस्योपदेशस्य स्वस्वबुध्यनुसारतः।
गृहीतवन्तश्चत्वारो विनेयास्ते महात्मनः॥६॥
ज्ञानं ज्ञेयं च प्रत्यक्षं द्वयं वैभाषिका विदुः।
सौत्रान्तिकास्तु ज्ञेयार्थं मन्यन्ते चानुमानतः॥७॥
केवलं ज्ञानमेवास्ति योगाचारैः सुनिश्चितम्।
सर्वे घटादयो ज्ञेयपदार्था ज्ञानरूपिणः॥८॥
ज्ञानं ज्ञेयमुभे शून्ये तयोः सत्ता भ्रमात्मिका।
ज्ञानं शून्यमिदं सर्वमिति माध्यमिका विदुः॥९॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

हीनयानं महायानमिति बौद्धं मतद्वयम्।
अहिंसा परमो धर्मो वर्णितोऽस्त्यत्र निर्मलः॥१०॥
क्षणिकत्वस्य विज्ञानमात्मज्ञानमिहोच्यते।
प्रामाण्यं परतो ज्ञाने मोक्षश्चात्मलयो मतः॥११॥
नागार्जुनश्च मैत्रेयो वसुबन्धुस्तथैव च।
दिङ्नागो धर्मकीर्तिश्च बौद्धदार्शनिका मताः॥१२॥
बुद्धसंस्थापितो धर्मो बौद्धधर्मोऽभिधीयते।
बुद्धोपदेशोऽमृतवत् पालिभाषामयो महान्॥१३॥
मूलग्रन्थस्त्रिपिटकाख्यकोऽस्य बहु भासते।
सन्त्यङ्किता महायानधर्मग्रन्थाश्च संस्कृते॥१४॥
प्राधान्येनास्य ग्रन्थस्य सम्प्रदायचतुष्टयम्।
वैभाषिकोऽभूत्प्रथमः परः सौत्रान्तिकः स्मृतः॥१५॥
तृतीयो योगाचाराख्यस्तुर्यो माध्यमिकाभिधः।
सर्वास्तिवादः प्रथमे प्रत्यक्षस्य प्रभावतः॥१६॥
अनुमानप्रभावेण पूर्ववादोऽभिजायते।
सम्प्रदाये द्वितीयेऽपि सौम्ये सौत्रान्तिकाभिधे॥१७॥
योगाचारमते भाति वादो विज्ञाननामकः।
विज्ञानमथवा चित्तं तत्र सत्यं प्रतीयते॥१८॥
सम्प्रदाये चतुर्थे तु शून्यवादो विराजते।
तन्मते जगतः सर्वे पदार्थाः शून्यरूपिणः॥१९॥

अयमत्र सङ्ग्रहश्लोकः—

मुख्यो माध्यमिको विवर्तमखिलं शून्यस्य मेने जगद्
योगाचारमते तु सन्ति मतयस्तासां विवर्तोऽखिलः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अर्थोऽस्ति क्षणिकस्त्वसावनुमितो बुद्ध्येति सौत्रान्तिकः,
प्रत्यक्षं क्षणभङ्गुरं च सकलं वैभाषिको भाषते॥२०॥
लोकायतार्हतौ लोके केचित् कापालिकादयः।
एवमन्येऽपि विद्यन्ते नास्तिका वेदनिन्दकाः॥२१॥

नकुलीशपाशुपतदर्शनम्:–

माहेश्वराणां विदुषामरुचिर्वैष्णवे मते।
मोक्षेऽपि परतन्त्रत्वाज्जीवानां दास्यकर्मणाम्॥१॥
तस्मात् पाशुपतं शास्त्रं मोक्षे स्वातन्त्र्यकामिनः।
माहेश्वरमहाचार्याः प्रवदन्त्यमितप्रभाः॥२॥
पशुः पतिस्तथा पाशः इति तत्त्वत्रयं स्मृतम्।
पशुर्जीवः पतिः शम्भुः पाशः संसारबन्धनम्॥३॥
ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः।
पशवः परिकीर्त्यन्ते समस्ताः पशुवर्तिनः॥४॥
पशुवद् ये तु वर्तन्ते त एव पशुवर्तिनः।
इति व्युत्पत्तिमात्रेण जीवाश्च पशवः स्मृताः॥५॥
ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्तिताः।
तेषां पतिर्महादेवः स्मृतः पशुपतिः श्रुतौ॥६॥
महेश्वरस्य सम्प्राप्त्यै दुःखान्तकरणाय च।
शास्त्रमेतत्समाख्यातं माननीयं महात्मभिः॥७॥
निर्वाणहेतुर्गदितो यथावत्तत्त्वनिश्चयः।
स चानेनैव शास्त्रेण तस्मादाश्रीयतामिदम्॥८॥

शैवदर्शनम्:–

पतिः पशुश्च पाशश्च पदार्थाः शैवदर्शने।
त्रय एते समाख्याताः शैवदर्शन-सूरिभिः॥१॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पतिरीशः पशुर्जीवः पाशः संसारबन्धनम्।
प्रत्यभिज्ञाप्रदीपेऽपि स्पष्टिरेषां प्रदर्शिता॥२॥

रसेश्वरदर्शनम्:–

देहपातोत्तरं मुक्तिरन्यत्रास्ति समीरिता।
मुक्तिः प्रदर्श्यतेऽमुष्मिन् जीवितानाञ्च दर्शने॥१॥
ज्ञानान्मुक्तिस्तदभ्यासात् स्थिरदेहे च स स्मृतः।
तस्माद् दिव्यशरीराप्त्यै सेवनीयोऽस्ति पारदः॥२॥
पारदो रसराजोऽयं विदधात्यजरामरम्।
शरीरं स्वगुणैर्दिव्यैः सेवितस्तु यथाविधि॥३॥
भवदैन्यविनाशाय पारदः परिकीर्तितः।
संसारस्य परं पारं दत्तेऽसौ पारदः स्मृतः॥४॥
पारदस्य च संस्कारा रसशास्त्रे निरूपिताः।
स्वेदनाद्या महातन्त्रे रसज्ञानां महात्मनाम्॥५॥
शरीरं जरया जीर्णमाधिव्याधिनिकेतनम्।
बुद्धीन्द्रियबलाभावं समाधौ नैव युज्यते॥६॥
शरीरमेव विद्यानां गृहं नैरूज्यसंयुतम्।
धर्मार्थकाममोक्षाणां दृढं मूलमनुत्तमम्॥७॥
तस्माद् रसं सेवमानो महेश्वरपरायणः।
समाधिनिष्ठो नितरां पुरुषार्थं प्रपूरयेत्॥८॥

पाणिनिदर्शनम्:–

जगन्निदानं स्फोटाख्यः शब्दो ब्रह्मैव नापरः।
नित्य एवायमखिलं प्रपञ्चं तनुतेतराम्॥१॥
अनादिनिधनं ब्रह्म शब्दतत्त्वं तदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥२॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शब्दानुशासनं द्वारमपवर्गस्य विद्यते।
पवित्रं सर्वविद्यानां वाङ्मलानां चिकित्सितम्॥३॥
स्फोटसिद्ध्याख्यके ग्रन्थे स्फोटोयं परिचीयताम्।
विद्वन्मूर्धन्यनागेशरचिते बुद्धिकौशले॥४॥
सुन्दरं स्फोटसाम्राज्यं मञ्जूषादिषु राजते।
जिज्ञासवो बुधास्तत्र विहरन्तु निजेच्छाया॥५॥
शब्दो ज्ञातः सदाभीष्टं स्वर्गे लोके च यच्छति।
शास्त्रान्वितः सुप्रयुक्तः सम्यगेकोऽपि सत्वरम्॥६॥
षट्स्वङ्गेषु च वेदानां मुखं व्याकरणं स्मृतम्।
तस्माद् यत्नोऽत्र कर्तव्यः शब्दतत्त्वाप्तिहेतवे॥७॥
लौकिका वैदिकाः शब्दा विनिर्दिष्टाः पृथक् पृथक्।
यत्र युक्त्या, तदध्येयं शब्दशास्त्रं विशेषतः॥८॥
पातञ्जले महाभाष्ये शब्दशास्त्रप्रयोजनम्।
विस्तराद् वर्णितं तस्मादध्येयं नान्यथा गतिः॥९॥
वेदरक्षार्थमध्येयमिदं शब्दानुशासनम्।
सता सन्देहसन्दोहो विघातव्योऽमुनाञ्जसा॥१०॥
धर्मः षडङ्गो वेदश्च ज्ञेयोऽध्येयः सदादरात्।
इत्येवमागमो लोके प्रवर्तयति सज्जनान्॥११॥
शब्दशास्त्रस्थितेनैव लघूपायेन सत्वरम्,
भवन्ति शब्दा विज्ञाताः सर्वे नैवात्र संशयः॥१२॥
विचिकित्सामपाकर्तुं त्वरितं साधनं महत्।
शब्दशास्त्रं सदोपास्यमिति भाष्यकृतो वचः॥१३॥
बहुनादर्शपुरुषैः शब्दशास्त्रप्रयोजनम्।
भूयसा सत्प्रयासेन यथास्थानं प्रदर्शितम्॥१४॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वादविचारः–

आरम्भवादः कणभक्षपक्षः संघातवादस्तु भदन्तपक्षः।
सांख्यादिपक्षः परिणामवादो वेदान्तपक्षस्तु विवर्तवादः॥१॥
विवर्तमध्ये खलु दृष्टिसृष्टिवादश्च तन्त्रे प्रतिबिम्बवादः।
पातञ्जलानामथ सांख्यकानां विराजतेऽसौ परिणामवादः॥२॥
रामानुजीया अपि सूक्ष्मप्रज्ञा वदन्ति युक्त्या परिणामवादम्।
सत्कार्यवादादिकमेवमेव मनीषिमान्यं लभते स्थितिं स्वाम्॥३॥
वैशेषिकाणां विज्ञानां न्यायशास्त्रविपश्चिताम्।
आरम्भवादो विख्यातः कार्योत्पत्तेश्च कारणात्॥४॥
वैभाषिकाणां बौद्धानां सौत्रान्तिकसतामथ।
संघातवादो विदितस्तन्तुसंघैः पटोद्भवात्॥५॥
बौद्धा माध्यमिकाः प्राहुरसद्वादं विचक्षणाः।
समेषामेव कार्याणामसद्धेतुनिरूपणात्॥६॥
सतत्त्वतोऽन्यथाप्रथा विकार (परिणाम) इत्युदाहृतः।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः॥७॥

ख्यातिसमाख्याः–

बौद्धा माध्यमिका प्राहुः शून्यवादपरायणाः।
असतो भासनान्नित्यमसत्ख्यातिं विचक्षणाः॥१॥
आत्मनो बाह्यरूपेण सर्वदा चावभासनात्।
विज्ञानवादिनो बौद्धा आत्मख्यातिं प्रचक्षते॥२॥
सांख्यपातञ्जलाद्वैतमतवेदान्तमानिनः।
अनिर्वाच्यसमाख्यां तां ख्यातिमाख्यान्ति सज्जनाः॥३॥
शक्तौ दोषवशाद् भूयो रौप्यरूपावभासने।
अन्यथाख्यातिराख्याता ख्यातितत्त्वविशारदैः॥४॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रामानुजीया मन्यन्ते सदा सत्ख्यातिमादरात्।
स्वीकृता पूर्णताख्यातिः प्रत्यभिज्ञापरायणैः॥५॥
मीमांसकानां विज्ञानां मतेऽख्यातिः प्रवर्तते।
एवं ख्यातिसमाख्यायां विवेको बहुधाऽद्भुतः॥६॥

ईश्वरविवेकः—

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो-
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः,
सोऽयं संविदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः॥१॥
शब्दानुशासने सिद्धाः शाब्दिकाः शब्दमीश्वरम्।
पराख्यं वन्द्यविद्वांसो वदन्तीश्वरभावनाः॥२॥
निर्विशेषश्च निर्लेपो निर्गुणः पारमार्थिकः।
परमात्माऽद्वितीयोऽभूतच्छशङ्कराचार्यसंमतौ॥३॥
नियन्ता सर्वजीवानामन्तर्यामी सदेश्वरः।
जीवातिरिक्तो भवति रामानुजमते प्रभुः॥४॥
एवमन्यान्यरूपेण पश्यन्ति परमेश्वरम्।
सन्तः सच्छास्त्रमननैरतिनिर्मलमानसाः॥५॥
अगम्येश्वररूपस्य को भवेद् वर्णनापरः।
तस्मात् संक्षिप्य विषयं भवामि विरतोऽधुना॥६॥

जीवः—

देह एवास्ति जीवात्मा इति चार्वाकसम्मतिः।
केचित्प्राणं मनश्चान्ये विदन्त्यात्मानमादरात्॥१॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विज्ञानरूपो जीवात्मा इति बौद्धविचारणा।
आस्तिकानाञ्च सर्वेषां मते जीवस्य नित्यता॥२॥

मोक्षः—

स्वातन्त्र्यं मरणं वापि मोक्ष इत्यभिधीयते।
लोकायतस्य सिद्धान्ते विचित्रे परमाद्भुते॥१॥
मुक्तिरात्मसमुच्छेद इति माध्यमिका जगुः।
बौद्धैश्च निर्मलज्ञानोदयो मोक्षोऽभिधीयते॥२॥
जीवस्योर्ध्वगतिर्मोक्षो जैनानामिति सम्मतिः।
भगवद्रूपसम्प्राप्तिर्मोक्षो रामानुजस्य च॥३॥
दुःखापृक्तं सुखं पूर्णं मोक्षं माध्वा प्रचक्षते।
परमैश्वर्यसम्पत्तिर्मोक्षः पाशुपतश्रुतौ॥४॥
शिवत्वप्राप्तिः शैवानां मोक्षो निर्दिश्यते पृथक्।
प्रत्यभिज्ञानये पूर्णत्वगतिर्विनिगद्यते॥५॥
रसजाते तनुस्थैर्ये श्रीरसेश्वरदर्शने।
जीवन्मुक्तिश्च मोक्षोऽभून्मृतानां नैव मुक्तता॥६॥
वैभाषिकाणां मोक्षोऽभूद्गुणोच्छेदो न चापरः।
शाश्वतो दुःखविरहो न्याये मोक्षोऽभिमन्यते॥७॥
मोक्षमाचक्षते मान्या मीमांसकमहोदयाः।
स्वर्गप्राप्तिं प्रमाणज्ञा विचारविमलाशयाः॥८॥
परा वाङ् मूलचक्रस्था तद्दृष्टिर्मुक्तिनामिका।
पाणिनीयमहाप्राज्ञैर्विहितोऽसौ विनिर्णयः॥९॥
पुरुषस्य स्वरूपावस्थितिर्मुक्तिरुदीर्यते।
सांख्यैरसंख्यविद्वद्भिर्वन्दितैर्विदितैर्भवे॥१०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रकृतेश्च मूलप्रकृतौ लयः पातञ्जले मते।
निरूपाधिकरूपेण चितिशक्तेश्च संस्थितिः॥११॥
मुक्तिराख्यायते प्रख्येऽमितयुक्तिसमन्विते।
दुराधर्षे सदाराध्ये साध्ये साधनतत्परैः॥१२॥
मूलाज्ञाननिवृत्तौ स्वस्वरूपाधिगमः पुनः।
मुक्तिरद्वैतसिद्धान्तवादिवेदान्तिभिर्मता॥१३॥

प्रमाणविचारः—

प्रमाणमाहुः प्रत्यक्षं चार्वाकाः केवलं बुधाः।
बौद्धार्हताश्च सहितमनुमानेन सज्जनाः॥१॥
वैशेषिकाणां सिद्धान्तः प्रमाणविषये समैः।
बौद्धार्हतसमो बोध्यो बुधैर्नास्त्यत्र संशयः॥२॥
प्रत्यक्षशब्दभेदेन प्रमाणद्वयमीरितम्।
माध्वैरनन्तप्रतिभाभासुरैरमितप्रभैः॥३॥
प्रत्यक्षमनुमानञ्च प्रमाणं शब्दसंज्ञितम्।
मन्यन्ते मतिमन्मान्या विशिष्टाद्वैतमानिनः॥४॥
जरन्नैयायिका सांख्याः पातञ्जलविपश्चितः।
प्रमाणत्रितयं पूर्वकथितं संप्रचक्षते॥५॥
प्रत्यक्षमनुमानञ्चोपमानं शब्दसंज्ञितम्।
चतुष्टयं प्रमाणानां प्रमाणज्ञाः प्रमाणिताः॥६॥
नव्या जरत्ताराश्चापि न्यायविज्ञाः प्रचक्षते।
एवं माहेश्वरमतं प्रसिद्धं जगतीतले॥७॥
अर्थापत्त्या च सहितमाख्यान्त्यद्वैतवादिनः।
एवमेव समैर्बोध्या भट्टानामपि सम्मतिः॥८॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सम्भवानुपलब्धिभ्यामैतिह्येन समं पुनः।
संकलय्य पुराणज्ञाः प्रमाणानि प्रचक्षते॥९॥
चेष्टाप्यस्ति पृथङ् मानमिति तन्त्रविदां मतम्।
प्रमाणविषये ह्येवमाचार्यमतभिन्नता॥१०॥

इति औरङ्गावादमण्डलान्तर्गत "करहरी" ग्रामवास्तव्यपण्डित-श्रीरङ्गेश्वर नाथमिश्र "मधुरेश" विरचितं प्रत्यभिज्ञाप्रदीपस्य परिशिष्टं समाप्तम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

—: ग्रन्थकारवंशपरिचयः—

विद्वन्मण्डलमण्डिते करहरीग्रामे गयामण्डले,
सद्भक्तो मगवंशमस्तकमणिः श्रीदेवनारायणः।
आसीत्तद्गुणगौरवेण सुखिनो विद्वद्वरेण्याः सदा,
नम्रास्तं प्रतिभाप्रभावसहितं वाचस्पतिं मेनिरे॥१॥
शश्वद्धर्मपरायणस्य विमलप्रज्ञासमज्ञावतो,
बालोऽभूदनुकूलदिव्यसमये भाग्येन गङ्गाधरः।
बाल्येऽभ्यस्य समस्तशास्त्रनिवहं काश्यां प्रतिष्ठामगाद्,
भूयो भव्यविवेकविक्रमयशोराशिं स तेने स्वकम्॥२॥
श्रुत्वानेकमुखैस्तदीयसुयशः श्रीसिन्धियाधीश्वरो,
मान्यो माधवरावनामनृपतिस्तं स्वान्तिकं प्रापयत्।
प्रत्यक्षे विदुषां वरासनमदात्सत्स्वर्णसिंहासनं,
नत्वा तच्चरणाम्बुजे पुलकितः प्रेम्णालपन् सादरम्॥३॥
श्रौतस्मार्तविचारसारविभवो वेदान्तविद्वत्तमः,
काव्यव्याकरणागमादिनिपुणो ज्योतिर्विदामग्रणीः।
यज्ञैर्ग्वालियराधिपस्य तनयं तूर्णं समुत्पादयन्,
प्रापद्राज्यमनन्तरत्ननिचयं प्राज्यं स गङ्गाधरः॥४॥
निर्मायाधिकविस्तृतं सुललितं रम्यागरापत्तने,
सानन्दं द्रविणैर्निजाङ्गलमहाविद्यालयं नूतनम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्वीयौदार्यवशात्पुनर्बहु धनं कोशे समर्प्य प्रभु-
र्लोके दानमहोपकारकरणे धन्यं स्वमेवाकरोत्॥५॥
तमाङ्गलविद्यालयमागरायां महान्तमद्यापि समीक्ष्य सर्वे।
स्मृत्वा च गङ्गाधरदानशक्तिं मनस्यहो विस्मयमाप्नुवन्ति॥६॥
गङ्गाधरोऽध्यापनरीतिविज्ञोऽभिज्ञोऽनवद्याखिलकार्यजाते।
अध्यापिपत्संस्कृतशास्त्रतत्त्वं स्वयं विनेयान्मथुरानगर्याम्।
मुद्राः पञ्चसहस्त्रं मासिकवृत्तौ व्ययीकृत्य।
शिष्याणामिह सोऽभूत्कुलपतिसंज्ञो मगाव्जार्कः॥८॥
कुलपतिपदभाजो मान्यगङ्गाधरस्य,
जयति विमलवंशे श्रीरमानथमिश्रः।
सरससरलरीत्या तत्सुतो ग्रन्थकर्ता,
विशदचरितचेता एष रङ्गेश्वराख्यः॥९॥

वंशवृक्षः

बिहारप्रान्तसर्वस्वगयामण्डलमध्यगः।
ग्रामः करहरीनामा भात्येकोऽतिपुरातनः॥१॥
देवनारायणो मिश्रस्तत्र जातोऽमलान्वये।
वेदवेदान्तविद्विज्ञैरपि मान्यो महामतिः॥२॥
गङ्गाधरसुतस्तस्य बभूव परमाद्भुतः।
योऽतिशीघ्रमनायासं वैदुष्यं समवाप्तवान्॥३॥
गङ्गाधरस्य सर्वत्र गता कीर्तिरनश्वरा।
सिन्धियाधीश्वरः श्रावंश्रावं तामतिविस्मितः॥४॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रेषयामास सस्नेहं सादरं पत्रपञ्चकम्।
गङ्गाधरस्य निकटे सद्योदर्शनलालसः॥५॥
सिन्धियाधीश्वरप्रेम्णा श्रीमद्गङ्गाधरः सुधीः।
निःशेषशास्त्रमर्मज्ञो शश्वद् गवालियरं गतः॥६॥
स्वर्णसिंहासनारूढस्तत्र पण्डितकेसरी।
गङ्गाधरोऽप्रमेयश्रीर्बभौ मेरौ मृगेन्द्रवत्॥७॥
दातुमारब्धवान् पञ्चसहस्रं मासवेतनम्।
सिन्धियाधीश्वरस्तस्मै तत्प्रभृत्येव भावतः॥८॥
भूमिदानेन रत्नैश्च विद्वासं तमतोषयत्।
विनम्रो बुधवर्याणां भक्तो ग्वालियरेश्वरः॥९॥
नभोनेत्रसहस्रात्मा राज्यदायश्च वार्षिकः।
सम्प्राप्तात्समभूत्तस्य प्रजासन्तोषणात्परम्॥१०॥
समुपार्जितवित्तान्यागरानिर्मलपत्तने।
महाविद्यालयं भव्यं व्ययीकृत्य विनिर्ममौ॥११॥
महाविद्यालयो रम्यमत्र नोऽद्यापि राजते।
कीर्तिमाख्यापयन् गङ्गाधरस्याप्रतिमप्रभाम्॥१२॥
तस्य गङ्गाधरस्यास्तां सुतौ शुद्धाशयौ बुधौ
टीकाधराभिधः पूर्वस्ततो लीलाधरोऽपरः॥१३॥
प्रथमो गोकुलानन्दो लीलाधरसुतोऽभवत्
कन्हैयालालनामाऽभूद् द्वितीयो मतिमान् महान्॥१४॥
कन्हैयालालमिश्रस्य पुत्रो विश्वेश्वरो ह्यभूत्।
बदरीनाथनामान्ते मगवंशयशस्करः॥१५॥
राधानाथरमानाथौ श्यामानाथश्च बुद्धिमान्।
बदरीनाथमिश्रस्य बभूवुस्तनयास्त्रयः॥१६॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पुकस्तपेश्वरो जज्ञे ततोऽभूद् भुवनेश्वरः।
श्रीरमानाथमिश्रस्य पश्चाद् रङ्गेश्वरः सुधी॥१७॥
सैष ग्रन्थस्य निर्माता सुधी रङ्गेश्वराभिधः।
पाणिनीयमहाशास्त्रे कृतभूरिपरिश्रमः॥१८॥
साहित्येऽन्यत्र शास्त्रेऽपि तथा वेदान्तदर्शने।
कृत्वा परिश्रमं पूर्णप्रतिभाऽप्रतिमो बुधः॥१९॥
पुष्पपुर्यां राजकीये साहित्याध्यापने रतः।
महाविद्यालये रङ्गेश्वरः सम्प्रति राजते॥२०॥
विद्याविनयसम्पन्नो विशालकुलसम्भवः।
रङ्गेश्वरमगोऽशेषविदुषस्तोषमत्यसौ॥२१॥

—०—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

–उपोद्घात–

लोक में अपेक्षा-रहित (पदर्थों) को कारण मानना उचित नहीं है। अतः घट के निर्माण में चक्र आदि कारण नहीं हैं।।१।।

यहाँ अपेक्षा से युक्त कुम्भकार ही घट का हेतु कहा जाता है। अपेक्षा चेतनों में ही होती है, जडमें कभी नहीं।।२।।

कर्म अचेतन होने से जगत् का कारण नहीं हो सकता। अतः निरपेक्ष महेश्वर ही इसके निर्माण में समर्थ हैं।।३।।

जगत् की उत्पत्ति में शिव को कर्म की अपेक्षा नहीं होती। अन्यथा (शिव की) परतन्त्रता होगी।।४।।

पूर्ण स्वतन्त्र परमेश्वर अपनी इच्छा शक्ति से ही समस्त पदार्थों से विशिष्ट जगत् की रचना करते हैं।।५।।

सब पदार्थ उन्हीं में प्रतिबिम्बित होते हैं। अतः जगत् में कोई भी पदार्थ उनसे पृथक् नहीं है।।६।।

परमेश्वर और जीव के तादात्म्य का अनुभव शैवसिद्धान्त से तथा अनुमान से शीघ्र सिद्ध होता है।।७।।

"इस लोक में मैं अन्य नहीं हूँ, अपितु परमेश्वर हूँ।" ऐसा जो अनुभव है वह प्रत्यभिज्ञा कहा जाता है।।८।।

केवल प्रत्यभिज्ञा से ही मुक्ति आदि की सिद्धि होती है। यहाँ बाह्य तथा आभ्यन्तर चर्याओं की कोई आवश्यकता नहीं होती।।९।।

प्रत्यभिज्ञा-शास्त्र से (अपने) परमेश्वरत्व का ज्ञान होने पर पूर्णकाम जीव के लिए कुछ भी प्राप्य नहीं बचता।।१०।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

माया जाल को काटकर स्वप्रकाश आत्मा की सिद्धि के लिए (अर्थात् उसमें) दृक् तथा क्रिया शक्तियों के प्रादुर्भाव के लिए प्रत्यभिज्ञा का प्रकाशन किया जाता है।।११।।

दृश्यमान (दिखाई देने वाले) लौकिक पदार्थों को प्रकाशित करने वाली परमात्मा शिव की शक्ति ज्ञानशक्ति कही गई है।।१२।।

(शिवकी) स्वेच्छा से लोकों का निर्माण करने में निपुण परा शक्ति सत् शास्त्रों के ज्ञाताओं के द्वारा क्रिया शक्ति कही गई है।।१३।।

अन्वय तथा व्यतिरेक से शिव ही (जगत् के) कर्त्ता सिद्ध होते हैं। "एक मैं अनेक रूपों में हो जाऊँ" ऐसी (शिवकी) इच्छा सृष्टि की साधिका है।।१४।।

जैसे योगी संकल्पमात्र से अन्य कारणों के विना भी घट आदि पदार्थों को उत्पन्न कर समस्त (जल लाना आदि) कार्य करते हैं।।१५।।

वैसे योगिराज महेश्वर अपनी इच्छा के ही बल से वृहत् जगत् को रचकर सब कामनाओं को पूरा करते हैं।।१६।।

त्रिशूल धारण करने वाले तथा सामग्रियों और आधार के विना ही संसार रूपी चित्र बनाने वाले उन शिल्पी (चित्रकार) को वार-वार नमस्कार है।।१७।।

परमेश्वर नट के समान माया से कर्मबन्धन को स्वीकार करते हैं और फिर अपनी इच्छा के द्वारा ही माया से मुक्त हो जाते हैं।।१८।।

कपाल धारण करने वाले (शिव) ने अद्वैतसिद्धान्त के सर्वत्र प्रचार के लिए प्रत्यभिज्ञा के सिद्धान्त को उत्पन्न किया।।१९।।

महादेवगिरि (कैलास) के वृहत् तथा धवल एक शिला खण्डपर ७७ शिवसूत्रों को अंकित किया गया।।२०।।

उसके प्रचार तथा दीर्घ जीवन की कामना वाले कपर्दी (जटाधारी शिव) ने सोए हुए वसुगुप्त को (स्वप्न) में स्वयं आदेश दिया।।२१।।

यह त्रिकदर्शन ही प्रत्यभिज्ञा दर्शन है। यहाँ जगत् और परमेश्वर का सम्बन्ध दर्पण और प्रतिबिम्ब के समान (माना गया) है।।२२।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यह (शिव में) प्रतिबिम्बित जगत् अभिन्न होते हुए भी भिन्नवत् प्रतीत होता है। अतः इसके आभास से ही यहाँ (प्रत्यभिज्ञादर्शन में) आभासवाद (माना गया) है।।२३।।

चित् शक्ति का स्फुरण रूप जगत् सत्य ही है, अन्य नहीं। अतः यहाँ परिणाम और विवर्त का सम्बन्ध नहीं (हो सकता)।।२४।।

यहाँ न केवल भक्ति ही (स्वीकृत) है और न केवल शुष्क ज्ञान ही। यहाँ अनेक प्रयत्नों से भक्ति और ज्ञान का समन्वय है।।२५।।

भक्ति द्वैतभावना के भय से शाङ्कर (प्रत्यभिज्ञा) सिद्धान्त में नहीं ठहर सकती। अतः इस त्रिकसिद्धान्त में निरपायिनी (नित्य तथा ज्ञानयुक्त) भक्ति ही (स्वीकृत) है।।२६।।

शिव के अद्वैत सिद्धान्त में माया अपनी इच्छा से ही अकस्मात् प्रवृत्त होती है। इस सिद्धान्त में दृष्टान्त सूर्य हैं।।२७।।

अनावृत ही सूर्य मेघों से अपने को आवृत कर चमकते रहता है। अन्यथा मेघों को आकाश में कौन प्रकाशित करेगा।।२८।।

शंकराचार्य के मत में निष्क्रिय होने से ब्रह्म की न्यूनता है। उसका लेशमात्र भी क्रिया शक्ति के प्रभाव से यहाँ नहीं है।।२९।।

अद्वैत का अनुभव होने पर भक्ति के लिए द्वैत की कल्पना की जाती है। वह द्वैत अद्वैत से भी मधुर तथा अति सुन्दर है।।३०।।

प्रत्यभिज्ञाशास्त्र में पारङ्गत, यशस्वी तथा श्रेष्ठ विद्वानों ने शिव से आरम्भ कर भूमि तक के ३६ तत्त्वों का वर्णन किया है।।३१।।

(यह प्रत्यभिज्ञा दर्शन) पशु आदि तीन तत्त्वों का वर्णन होने से त्रिक तथा त्र्यम्बक के द्वारा प्रचारित होने से त्रैयम्बक कहा जाता है।।३२।।

त्रिक के ही अर्थ में षडर्ध कहा जाता है। शास्त्र के पारंगत (पण्डितों) के द्वारा यह दर्शन स्फुरण (का निरूपक) होने से स्पन्द नाम से भी कहा जाता है।।३३।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मेरे विचार में विद्वानों के प्रत्यभिज्ञासम्बन्धी विचारों से प्रत्यभिज्ञादर्शन अधिक प्रसिद्ध हुआ।।३४।।

प्रत्यभिज्ञादर्शन के अनेक मान्य विद्वान् हुए। कुछ प्रधान विद्वानों के नामों का निर्देश किया जाता है।।३५।।

उनमें दुर्वासा प्रथम थे। उसके बाद त्र्यम्बक तथा आमर्दक हुए। सकल विद्याओं में निपुण श्रीनाथ चौथे हुए।।३६।।

त्र्यम्बक अद्वैत सिद्धान्त के, आमर्दक द्वैत के तथा श्रीनाथ द्वैताद्वैत के आचार्य माने गए है।।३७।।

सोमानन्द प्रतिभाशाली विद्वानों के लिए महानन्द स्वरूप थे। महामति वसुगुप्त भी मनीषियों में विख्यात हुए।।३८।।

वसुतुगुप्त के शिष्य बुद्धिमान् कल्लट हुए। तत्त्वज्ञानी उत्पलाचार्य तथा लक्ष्मणगुप्त हुए।।३९।।

